Barcode - 2030020016332
Title - Budhabhushhnd-ama~
Subject - PHILOSOPHY. PSYCHOLOGY
Author -
Language - Sanskrit
Pages - 132
Publication Year - 1926
Creator - Fast DLI Downloader
https://github.com/cancerian0684/dli-downloader
Barcode EAN.UCC-13



UNIVERSAL
LIBRARY
OU_184561
UNIVERSAL
LIBRARY

Government Oriental Series — Class C, No. 2

THE BUDHABHŪSANA OF KING SAMBHU

With an Introduction, Notes etc.

BY

H. D. VELANKAR, M. A.

Professor of Sanskrit, Wilson College, Bombay.

PUBLISHED BY

Bhandarkar Oriental Research Institute, Poona.

1926

OUP—902—26-3-70—5,000

OSMANIA UNIVERSITY LIBRARY

Call No. S 172.2 Accession No. S 2156

Author S18B

Title शंभुदत्त 1966.

बुध भूषणम्

This book should be returned on or before the date last marked below.


GOVERNMENT ORIENTAL SERIES

CLASS C, No. II

GOVERNMENT ORIENTAL SEIRES

CLASS C, No. II

PREPARED UNDER THE SUPERVISION OF
THE PUBLICATION DEPARTMENT OF
THE BHANDARKAR ORIENTAL
RESEARCH INSTITUTE,
POONA.



POONA
Bhandarkar Oriental Research Institute
1926

Government Oriental Series—Class C No. 2

THE

BUDHABHŪṢAṆA

OF

KING SAṀBHU

With an Introduction, Notes etc.

BY

H. D. VELANKAR, M. A.

Professor of Sanskrit, Wilson College, Bombay.

PUBLISHED BY

Bhandarkar Oriental Research Institute, Poona.

1926

Copies can be had direct from the Bhandarkar O. R. Institute, P. O. Deccan Gymkhana, Poona, India.

Price Re. ~~1 As. 8~~ per copy exclusive of postage.

POONA:

Printed from type set up at the Bhandarkar Institute Press Anandashram, Budhwar Peth, and published by V. G. PARANJPE, M. A., LL. B., D. Litt., Secretary, Bhandarkar Oriental Research Institute, POONA.

First Edition, One Thousand Copies.

श्रीमच्छंभुनृपाविरचितम्

॥ बुधभूषणम् ॥

एम्. ए. इत्युपपदधारणा

वेलणकरवंशोद्भवेन दामोदरसूनुना हरिशा

आङ्ग्लभाषाप्रस्तावनया टिप्पनीभिश्च संपादित

पुण्यपत्तनस्थ—

भाण्डारकरप्राच्यविद्यासंशोधनमन्दिराधि

भाण्डारकरमन्दिरमुद्रणालये मुद्रयित्वा प्राकाश्यं नी

शके १८४८, खिस्ताब्दे १९२६

मूल्यं सार्धो रूप्यकः

TABLE OF CONTENTS.

		Pages
Author's Preface	.. ..	viii
Introduction	... ...	ix-xv
Text	... ...	?-?६
Chapter I	... ...	?-?५
Chapter II	... ...	?६-८?
Chapter III	.. ..	?०-?६
Notes	... .	1-10

PREFACE

The present edition of the Budhabhūsana is based upon a single manuscript in the MSS library of the B. B R A Society of Bombay. The manuscript is incorrect in many places and has left some gaps here and there. From the writing and paper &c, the MS appears to have been written before 150 years, or so I am greatly indebted to the B B. R A. Society for allowing me to make use of their manuscript for this edition

I feel glad to express my obligations to Mr C A. Kincaid, C. I E, and also to the late Rao Bahadur Parasnis, both of whom gave me valuable information regarding Sambhaji.

I further acknowledge with gratitude, the assistance which I received from Mr Purushottam Vishram Mavji, J P., of Bombay. He showed me his own copy of a few selections from Sambhaji's Hindi poems, and permitted me to print them. These selections, however, have not been printed in this book as it is so desired by the Executive Board of the Bhandarkar Oriental Research Institute.

Lastly, I thank my friend Mr. G B Bapat, M A, who much helped me in preparing the press-copy, and others who similarly helped me in bringing out this edition.

H D VELANKAR

INTRODUCTION.

(A Reprint from J B. B. R. A S 1925)

In 1920 I was entrusted with the work of preparing a descriptive Catalogue of Sanskrit and Prakrit manuscripts of the Bombay Branch Royal Asiatic Society While doing this I came across an incomplete Sanskrit manuscript which on close inspection, was found to contain a Sanskrit work called "Budhabhūsana", claiming for its author King Śambhu, popularly known as Sambhaji, son of Shivaji the Great This was rather striking since nothing but vicious deeds, at the most brave and daring, are usually connected with the name of Prince Sambhaji On going through the whole work, however, I found that it scarcely contained anything of either literary or historical importance Nor could it decisively prove that Sambhaji was a man of letters. However, the mere fact that Sambhaji's name was connected with a literary work, has induced me to bring out an edition of the work

The wrok is apparently divided into three chapters, not clearly distinguished from each other The first contains 194 verses, mostly Subhāsitas, which are quotations from well-known authors, rendered popular owing to their strikingness, but often the sources of which are unknown. The first seventeen verses are introductory; they contain a brief history of the author's family, written in good easy Sanskrit and, together with the next eleven stanzas containing a hymn to Goddess Bhavānī, are the only few lines, which are directly from the author's pen. The first six of these contain praises offered to Gajānana, Śiva, Guru and Pārvatī The next ten are rather important I subjoin an English translation of these.

(7) There was a king called Shāha (Shahaji), who was the Indra of the earth, who was skilled in Politics and Fine Arts, whose deeds were brave and noble, whose fame was

extensive and who was the Moon rising from the midst of the ocean in the form of the family of Bhrśabalas ;

(8) Who worshipped the earth with an offering of the multitudes of the heads of hostile princes, which were severed (from their trunks) by a volley of arrows discharged from his bow, which was drawn right upto the ear—to him, the lofty crest jewel of numerous princes, was born the primeval Lord (i. e. Visnu) as his son, known widely by the name ' Śiva '.

(9) Victorious is Śiva, the invincible Chatrapati, ord of umbrella, who is (none but) the lord of the world (i. e God Visnu) who has assumed a partial incarnation, having seen the whole religion in distress, as it was bitten by the venomous serpent in the form of the Kali age

(10) [Śiva]—who in the course of the Buddha incarnation of Gopāla, while Kali was yet in his full strength on earth, (lit. had not yet declined) set up the Brahmans and other castes on a firm foundation in their respective walks of life, by vanquishing the enemies of the gods,—with a view to protect and revive the caste religion, which had been violently disturbed by the Mlechhas

(11) Having built fortresses for the protection of the earth on the best of the mountains inaccessible to the enemies, though called ' Sahya ', between Karnāṭaka on the one hand and Bāgalāna on the other and between the river Krsnā and the ocean (western), the foremost among the kings, reigns victorious in the inaccessible fort called Rairi (or Raigad)

(12) He conquered the whole of the earth from the eastern mountain to the western ocean and from the Setu (Adam's Bridge) to the mountain of cold (i. e the Himalayas), and made all princes pay tribute to him Having learnt the duties prescribed by the Śrutis, declared to him by the learned, he shines, day by day, on his throne, after the Coronation ceremony, by means of such symbols of royalty as the Chatra etc

(13) Who being a victorious prince, satisfied, on the

festive occasion of his coronation, the Brahmans, who had come from different places, with countless gifts of coins, garments, elephants and horses; and thus spread in all directions his fame, fit to be sung by gods and resembling in its purity, the lustre, which shoots out from the Moon.

(14) He it is whose fort shines with palaces and mansions in which princes dwell, with arches and beautiful market-squares, with new lakes filled with water all around, with learned priests, physicians and astrologers, with honest hereditary ministers and with the numberless brave armies of four kinds

(15) His son who is the crest jewel of all the fudatory chiefs and who is well versed in (lit has crossed the ocean in the form of) Poetry, Rhetoric, Purānas, Music and Archery, is famous by the name Śambhu

(16) That King Śambhuvarman is compiling this excellent book, having carefully read the works of the ancient writers and having taken his material from them

(17) May the wise accept what is good and give up what is bad, having carefully gone through our work; Rājahamsas indeed accept milk having abandoned water mixed with it.

This is purely an introduction which is followed by the work proper.

This is, however, introduced by a hymn of eleven stanzas addressed to Bhavānī and composed by the author himself, who naturally begins his work with a hymn to his favourite deity in order to secure uninterrupted completion.

This hymn is followed by fifteen stanzas (29–43) in praise of different deities, then by eighteen stanzas (44–61) expressive of benediction, both culled out from well-known ancient works Last of all come the Anyoktis in 130 stanzas (62–191) followed by three stanzas which are instances of a kind of literary puzzle known as Antarlāpikā (192–194).

The second chapter, which forms the main body of the work, contains 632 verses treating of politics The author here deals with the following subjects, of course always in verses cited from other works, usually from the Matsya

and Visnudharmottara Purānas and the Kāmandakīyanītisāra :—The king and his qualifications (1–31); his assistants (32-46); the prime minister (47–71); the princes, their education and duties (72–91); King's advisers (92–96); the other componant parts of a kingdom, a–Kośa (97–106); b–Rastra (107–110); c–Durga and its equipment (111–186); d–Bala i. e. the Army (187–198); King's duties (199–203); spies (204–215); attendants (216–241); councillors and the counsel (242–273); ambassador (274–284); King's duties (285–321); King's vices (322–367); invasion (368–396); King's duties in general (397–632).

The third chapter contains miscellaneous information useful to princes and is, therefore, called Miśrakanīti-prakarana. Our manuscript contains 57 stanzas of this chapter and a portion of the 58th.

As regards the authorship of the work, the general opinion of the reader of the Maratha history is against ascribing any literary activities to Prince Sambhaji. The writers of the chronicles of the Maratha history, both old and new, leave an impression on the mind of the reader that Sambhaji though brave, was incapable of anything worthy of praise There is, however, nothing in them to show that Sambhaji was illiterate. Direct references to his literary merits and achievements cannot, of course, be expected in these chronicles whose sole aim was to narrate the political events of a particular period. We may, at the most, expect to get some casual reference and as a matter of fact we do get some from which it is possible to conclude that not only had Sambhaji received education at the hands of learned Pandits, but he had also taste for Sanskrit literature and was occasionally in the habit of writing poetry in Hindi under the influence of Kavi Kalaśa or the celebrated Kalusha, especially when passing his leisure hours in the company of beautiful women. The most explicit passage in this connection is that occurring on page 75 of Chitragupta's chronicle of Shivaji the Great. It refers to an incident which took place after Shivaji's escape from Delhi, together with Prince Sambhaji. Being hotly pursued by Aurangzeb's men, Shivaji was compelled to leave the Prince with a Pandit

named Kashipant at Benares. The learned Pandit taught him together with other boys, as though he were a Brahman boy. But even this would not satisfy the crafty officers of the Mongul Emperor. The Pandit then had to eat in the same dish with Sambhaji, in order to convince them that Sambhaji was a Brahman and not a Maratha. " He then made atonements secretly (for the sin thus committed). He began to impart instructions to him in general Literature, and made him well versed in Sārasvata (grammar), Amarakośa Raghuvamśa, Siddhāntakaumudī, (Siddhānta-) Muktāvali and other similar works. He, i e. Sambhaji became very clever"; according to another chronicle (Marāthī Sāmrājyāchi Chotī Bakhara, i e. A short historoy of the Maratha Empire p. 32), the period during which he stayed there was about one year. If we believe in the Chroniclers, it is not impossible to maintain that Sambhaji obtained at least an elementary knowledge of the Sanskrit Language during this forced stay of his at Benares Another passage which refers to the care bestowed upon Sambhaji's education by King Shivaji, is found on page 20 of the 91 articled chronicle of King Shivaji. There one Umaji Pandit is said to have been appointed to teach the Prince who was kept at Shringarpoor

From the passages quoted above, we can safely conclude that Prince Sambhaji did receive at least an elementary knowledge of the Sanskrit Language and Literature during his boyhood. But there appear to have been original letters from which we can judge that he had kept up the habit of reading Sanskrit during his leisure hours till his advanced age. Thus for instance, Kincaid and Parasnis, in their History of the Maratha People, part II, p. 58, remark— " Although he (i. e. Sambhaji) spent most of his life campaigning he was by no means averse from study. He employed a learned man called Keshav Pandit Adhyaksha, a friend of the great king to read with him Vālmiki's celebrated epic, the Rāmāyana. As a reward he gave Keshava in 1684 A. D., 1600 small silver coins known as ladis. The king was moreover no mean versifier. He is known to have written two books of Hindi poetry. The first was

called Nakhashikha, in which he described the pleasures of love. The second was named Nayakabhad. In it he sang the varying charms of the beauties who beguiled his leisure moments" Even though the learned authors do not give the source of their information, we can presume that they have got it from some literary documents either in the form of letters or of chronicles

We are of course aware that the incident herein referred to, cannot go to prove that King Sambhaji was a good Sanskritist We do not surely expect a Sanskrit author to require the help of a Śāstri for reading Vālmīki's Rāmāyana It must on the contrary be conceded that this is not a reference to the mere employment of a Puranik—though this is not entirely impossible—as a special reward consisting of silver coins is said to have been given to him for the services. But even this meagre knowledge of the Sanskrit Language on the part of King Sambhaji, which at least we can safely presume from the incident, is enough for our purpose. For the compilation of a work of the type we have before us does not require profound knowledge of the language, especially when the author was a Prince who commanded the services of learned Pandits

All this, I hope, is sufficient to prove that King Sambhaji was the real compiler of the book before us He may have been assisted by his Pandits in the task of selecting and arranging the quotations of which the work consists, but he was the principal figure It proves at any rate that Sambhaji was fond of reading Sanskrit in the original and that he had the ambition of being called a Sanskrit poet

The second part of the quotation from "A History of the Maratha People" given above is rather curious It is based upon the recent researches of Mr. Purushottam Vishram Mavji, J. P of Bombay as I learnt from the learned authors themselves I am greatly indebted to Mr. Mavji, who very kindly handed over to me his own copy of a few stanzas selected from Sambhaji's two works of Hindi poetry From hese stray verses, we can judge about the contents and form of the two poems The first of these is called

"Nakhaśikha" in which the author gives a poetical description of the different parts of Rādhā's body from the nail of the foot (नख) to the crest (शिखा). In the second which is obviously a work on Rhetoric and is called "Nāyikābheda" (Nayakabhad in the quotation from the 'History' is evidently a misprint) we find a description of the different sorts of heroines such as Madhyamā, Praudhā, Khanditā etc., just after the fashion of Sanskrit writers on Rhetoric. The few quotations that we have got, disclose a close acquaintance on the part of our author with the Sanskrit works on Rhetoric.

Among the quotations we find one from the pen of the famous Kalusha. It is highly poetical and even though we unforunately do not possess any literary remains of this great favourite of King Sambhaji, we have grounds to believe that he was a literary man In the old chronicles he is described as Kavi Kalaśa or the poet Kalaśa It was popularly believed that this Kanuja Brahman had been purposely sent by the Emperor from Delhi and that he was a great enchanter As a matter of fact we know that this Kalusha did exert a wonderful influence upon the King but to what it was due we can simply guess The origin of this influence is shrouded in obscurity. We will not be, however, far from the truth in assuming that to a considerable extent his literary gifts helped Kalusha to maintain his influence with the Prince It is quite possible that this Kavi Kalusha may have composed several poems, which were not preserved owing to the general disfavour in which he was held, but stray copies of which may yet have existed and might one day be discovered by us We on our part, are inclined to believe that the two Hindi poems (there may be more to the kind) are really from the pen of Prince Sambhaji, composed by him under the literary influence of Kalusha, who was certainly gifted with poetic talents.

श्री

बुधभूषणम्

॥ श्रीगणेशाय नमः ॥ श्रीनृसिंहाय नमः ॥

देवदानवकृतस्तुतिभागं हेलया विजितदर्पितनागम् ।
भक्तविघ्नहनने धृतर(य)त्नं तं नमामि भवबालकरत्नम् ॥ १ ॥

शशाङ्कमौलिं भासितेन भासुरं पञ्चाननं शैलसुताधिनाथम् ।
त्र्यक्षं गिरीशं दशबाहुमण्डितं कुबेरमित्रं सततं नमामि ॥ २ ॥

विरिञ्चिविष्णुवन्दितं नगाधिराजकन्यका-
विभूषितार्धविग्रहं प्रभूतबन्दिसंस्तुतम् ।
लसज्जटातटस्फुरत्सुरापगाविनिःसर-
द्विशुद्धवारिशीतलं नमामि चन्द्रशेखरम् ॥ ३ ॥

अज्ञानकृष्णसर्पेण दंशिता भुवि मानवाः ।
तेषां जीवनहेत्वर्थं नौमि जाङ्गुलिकं गुरुम् ॥ ४ ॥

या भवेक्षणचका(को)र चान्द्रिका शांभवी निजजनस्य पालिका ।
या तुषारगिरिराजकन्यका सा ममास्तु शुभकालमालिका ॥ ५ ॥

सर्वदेवमयीमीशां नौमि भूषासमन्विताम् ।
यस्याः कटाक्षमात्रेण जायन्ते विबुधा नराः ॥ ६ ॥

भूशबदा(ला)न्वयसिन्धुसुधाकरः प्रथितकीर्तिरुदारपराक्रमः ।
अभवदर्थकलासु विशारदो जगति शाहनृपः क्षितिवासवः ॥ ७ ॥

येनाकर्णविकृष्टकार्मुकचलत्काण्डावलीकर्तित-
प्रत्यर्थिक्षितिपालमौलिनिवहैरभ्यार्चं विश्वंभरा ।
यस्यानेकवसुंधरापरिवृढप्रोत्तुङ्गचूडामणेः
पुत्रत्वं समुपागतः शिव इति ख्यातः पुराणो विभुः ॥ ८ ॥

कलिकालभुजंगमावलीढं निखिलं धर्ममवेक्ष्य विक्लवं यः ।
जगतः पतिरंशतोवतापोः(तीर्णः) स शिवच्छत्रपतिर्जयत्यजेयः ॥९॥

येन क्षोणितले कलावविकले बुद्धावतारं गते
गोपालेखिलवर्णधर्मनिचये म्लैच्छैः समासादिते ।
भूयस्तत्परिपालनाय सकलाञ्छित्वा सुरद्वेषिणः
स्वे स्वे वर्णपथे चिरेण विहिता विप्रादिवर्णाः क्रमात् ॥ १० ॥

आकर्णाटकदेशतो गिरिवरे सह्येप्यसह्ये परै-
र्दुर्गाणि क्षितिपालनाय नृपतेर्यो बागलाणावधि ।
आकृष्णातटमासमुद्रमभितः कृत्वा कृती दुर्गमे
दुर्गे रायरिसंज्ञके विजयते भूमीभृतामग्रणीः ॥ ११ ॥

आपूर्वाचलपश्चिमाम्बुधिमथाप्यासेतुशीताचलं
निर्जित्यावनिमण्डलं च करदीकृत्याखिलान्भूमिपान् ।
श्रौतं धर्ममवाप्य सद्भिरुदितं राजाभिषेके परं
छत्राद्यैर्नृपलक्षणैरनुदिनं सिंहासने राजते ॥ १२ ॥

नानादेशसमागतान् द्विजवरान्येनाभिषेकोत्सवे ।
संतर्प्यातुलतोलितैर्बहुधनैर्वस्त्रैर्गजैर्वाजिभिः ।
चन्द्रप्रेरितचान्द्रकेव विमला गेया बुधैर्बान्दिभिः
कीर्तिः सर्वदिगन्तरेषु जयिना विस्तारिता भूभृता ॥ १३ ॥

सोयं यस्य गडो नरेन्द्रवाहितैः प्रासादहर्म्यैरट्टै(?)
म्यरापपा (रम्यैरापण?)चत्वरैश्च परितः पूर्णैः सरोभिर्नवैः ।
विद्वद्वैदिकवैद्यवर्यगणकैराद्यैश्च सन्मन्त्रिभिः
सैन्यैश्चापि चतुर्विधैरगणितैर्भाति प्रतापान्वितैः ॥ १४ ॥

तस्यात्मजः शंभुरिति प्रसिद्धः समस्तसामन्तशिरोवसन्तः (वतंसः)।
यः काव्यसाहित्यपुराणगीतकोदण्डाविद्यार्णवपारगामी ॥ १५ ॥

विविच्य शास्त्राणि पुरातनानामादाय तेभ्यः खलु सोयमर्थम् ।
करोति सद्ग्रन्थममुं नृपालः स शम्भुवर्मा बुधभूषणाख्यम् ॥ १६ ॥

विविच्य सन्तः कृतिमस्मदीयां गृह्णन्तु सच्चासदसच्च जन्तु (त्यजन्तु) ।
क्षीरावियुक्तं परिहृत्य नारीं (नीरं) क्षीरं भजन्ते खलु राजहंसाः ॥१७॥

निर्विघ्नसमाप्तये श्रीभवान्याः स्तुतिं स्वकृतामा —

स्फटिकरचितपीठे श्यामलाङ्गीं भवानी–
मरुणचरणकान्तिं भासयन्तीं स्वरूपम् ।
नखमणिगुणयुक्ता अङ्गुलीर्भासयन्तीं
विजितसितगरुन्द्रिर्नूपुरैर्गुल्फयुग्मम् ॥ १८ ॥

पद्मरागारुणश्रीकशिरःपुष्पेण शोभिताम् ।
हृतशीतांशुतेजस्कमुक्ताचन्द्रोपशोभिताम् ॥ १९ ॥

अतीव सुकुमाराङ्गीं प्रोल्लसच्चूर्ण(स्वर्ण)कुण्डलाम् ।
भ्रूवल्लिभङ्गिसौन्दर्यजितकामशरासनाम् ॥ २० ॥
मदिरामदसंघूर्णमदिराक्षीं मदालसाम् ।
निर्मलादर्शसंदर्शकपोलकफल(फलक)प्रभाम् ॥ २१ ॥

विलसद्भालतिलकां मुक्तागुणसमान्विताम् ।
विभासद्रत्नसंयुक्तां कर्णभूषणशोभिताम् ॥ २२ ॥

नानालङ्कारसंयुक्तां नासान्यस्तमयूरिकाम् ।
पूर्णेन्दुहृद्यवदनां प्रवालतुलिताधराम् ॥ २३ ॥

सुवर्तुलस्तनद्वन्द्वमुक्ताकञ्चुकिकावृताम् ।
चतुर्भुजां पद्महस्तां पद्मनेत्रविराजिताम् ॥ २४ ॥

रतिरक्तां शम्भुकान्तां निम्ननाभिं तनूदरीम् ।
कृशमध्यां कृशाङ्गीं च ध्यानयोगासने रताम् ॥ २५ ॥

विलस(द्र)क्तवसनां रक्तकाञ्चीपरिवृताम् ॥ ।
विशा(ल)जघनां रम्यां सौन्दर्यौदार्यमन्दिराम् ॥ २६ ॥

सुवर्णरम्भां दम्भारि(?)म(मृ)दुलोरुविराज(जि)ताम् ।
कामेषुधिसुहृज्जङ्घां जानुयुग्मोपशोभिताम् ॥ २७ ॥

इति चन्द्रचूडरमणीस्तुतिमेणा(नां)
धरणीशशम्भुरचितामतिभक्त्या ।
मनुजः पठेदनुदिनं स किलोच्चै–
र्भुवि भारतीजलधिजानिलयं स्या(त्) ॥ २८ ॥

अथ प्राचिननमस्कृतिः—

चलत्कर्णानिलोद्धूतसिन्दूरारुणिताम्बरः ।
जय(त्य)काले विसृजन्सन्ध्यामिव गजाननः ॥ २९ ॥

हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् ।
कालकूटाविषस्पर्शजातमूर्च्छागता(मा)मिव ॥ ३० ॥

चन्द्राननार्धदेहाय चन्द्रांशुसितकीर्तये ।
चन्द्रार्कानलनेत्राय चन्द्रार्धशिरसे नमः ॥ ३१ ॥

तारानायकशेखराय जगदाधाराय धाराधर-
च्छायाधारकन्धराय गिरिजासङ्गैकशृङ्गारिणे ।
नद्या शेखरिणे दृशा तिलकिने नारायणेनास्त्रिणे
नागैः कङ्कणिने नगेन गृहिणे नाथाय नित्यं नमः ॥ ३२ ॥

नमस्तुम्ब(ङ्ग)शिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥ ३३ ॥

वामाङ्गीकृतवामाङ्गी कुण्डलीकृतकुण्डली ।
आविरस्तु पुरो वस्तु भूतिभूत्यम्बराम्बरम् ॥ ३४ ॥

पिनाकपाणिबालेन्दुभस्ममन्दाकिनीयुता ।
तथापि भव ते मूर्तिरपवर्गानुसारिणी ॥ ३५ ॥

पुञ्जीभूतं प्रेम गोपाङ्गनानां
मूर्ति(र्ती) भूतं भागधेयं यदूनाम् ।
एकीभूतं गुप्तचित्रं श्रुतीनां
श्यामीभूतं ब्रह्म मे सन्निधत्ताम् ॥ ३६ ॥

नवनीलमेघरुचिरः पुरः (परः) पुमान्
अवनीमवाप्य धृतगोपविग्रहः ।
नवनीतकीर्तिरमरैरपि स्वयं
नवनीताभिक्षुरधुना स चिन्त्यते ॥ ३७ ॥

अतिविपुलं कुचयुगलं रहसि करैरामृशन्मुहुर्लक्ष्म्याः ।
तदपि हृतं निजहृदयं जयति हरिर्मृगयमाण इव ॥ ३८ ॥

मकरीविरचनभङ्ग्या राधाकुचकलशपीडनव्यसनी ।
ऋजुमपि लेखां लुम्पन्नटवरवेषो हरिर्जेयति ॥ ३९ ॥

खिन्नोसि मुञ्च शैलं बिभृमो वयमिति वदश्सु(त्सु) शिथिलभुजः ।
गिरिवरभुग्नविततबाहुषु गोपेषु हसन्हरिर्जयति ॥ ४० ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥ ४१ ॥

तं वन्दे पद्मसद्मानमुपवीतच्छटाछलात् ।
गङ्गा स्रोतस्त्रयेणै(णे)व यं सदैव निषेवते ॥ ४२ ॥

शुकतुण्डच्छविसवितुश्चण्डरुचेः पुण्डरीकवनबन्धोः ।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः ॥ ४३ ॥

अथाशिषः—

सानन्दं नम्द(दि)हस्ताहतमुरजरवाहूतकौमारबार्हि-
त्रासान्नासाग्ररन्ध्रं विशति फाणिपतौ भोगसंकोचभाजि ।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः ॥ ४४ ॥

गण्डस्थलीगलदमन्दमदप्रवाह-
मायद्द्विरेफमधुरस्वरदत्तकर्णः ।
हर्षादिवालसनिमीलितनेत्रयुग्मो
विघ्नच्छिदे भवतु भूतपतिर्गणेशः ॥ ४५ ॥

अथ भवान्याः—

अनुकृतम(र)क(त)वर्णा शोभितकर्णा कदम्बमुकुलेन ।
नखमुखमुखरितवीणा मध्ये क्षीणा शिवा शिवं कुर्यात् ॥ ४६ ॥

स्वेदत्ते(स्ते ?) कथमीदृशः प्रियतमे त्वन्नेत्रवह्न्यर्चिषा ।
कस्माद्वेपितमेतदिन्दुवदने भोगीन्द्रभीतेर्भव ।
रोमाञ्चः कथमेष देवि भग(वन्)नागाम्भसां सीकरै-
रित्थं भर्तरि भावगोपनपरा गौरी चिरं पातु नः ॥ ४७ ॥

विद्राणे रुद्रवृन्दे सवितरि तरले वज्रिणि ध्वस्तवज्रे
जाताशङ्के शशाङ्के विरमति मरुति त्यक्तवैरे कुबेरे ।
वैकुण्ठे कुण्ठितास्त्रे महिषमतिरुषा पौरुषोपघ्नानिघ्नं
निर्विघ्नं निघ्नती वः शमयतु दुरितं भूरिभावा भवानी ॥ ४८ ॥

तव करकमलस्थां स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाडिमीबीजबुध्या ।
अनुकलमनुकुर्वन्येन कीरो निरुद्धः
स भवतु मम भृत्यै वाणि ते मन्दहासः ॥ ४९ ॥

अथ शंभोः—

जीर्णेप्युत्कटकालकूटकवले प्यु(प्लुष्टे) हठान्मन्मथे
नीते भास्क(स्व)रभालनेत्रतनुतां कल्पान्तदावानले ।
यः शक्त्या समलंकृतोपि शशिनं शैलात्मजां स्वर्धुनीं
धत्ते कौतुकराजनीतिनिपुणः पायात्स वः शङ्करः ॥ ५० ॥

केयूरीकृतकङ्कणीकृतजटाजूटावतंसीकृत–
ज्यावल्लीकृतकुण्डलीकृतकटीसूत्रीकृताहीश्वरः ।
पायाद्वस्तिलकीकृतप्रियतमादर्शीकृताक्षीकृत–
द्यूतारम्भपणीकृतेन्दुशकलः कात्यायनीकामुकः ॥ ५१ ॥

पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौ(री)भुजलता यत्र विद्युल्लेखेव राजते ॥ ५२ ॥

स धूर्जटिजटाजूटो जायतां विजयाय वः ।
यत्रैकापि लताभ्रान्तिं करोत्यद्यापि जाह्नवी ॥ ५३ ॥

अथ विष्णोः—

कृष्ण त्वं नवयौवनोसि चपला प्रायेण गोपाङ्गना
कंसो भूपतिरब्जनालमृदुलग्रीवा वयं गोदुहः ।
तद्याचेऽञ्जलिना भवन्तमधुना वृन्दावनं मन्दु(?) ना ।
मा यासीरिति नन्दगोपवचसा नम्रो हरिः पातु वः ॥ ५४ ॥

भ्राम्यन्मन्दरकन्दरोदरदरी व्यावर्तिभिर्वारिधेः
कल्लोलैरलमाकुलं कलयतो लक्ष्म्या मुखाम्भोरुहम् ।

औत्सुक्यात्तरलाः स्मराद्विकसिता भीत्या समाकुञ्चिताः
क्रोधेन ज्वलिता मुदा मुकुलिताः शौरेर्दृशः पातु(न्तु) वः ॥ ५५ ॥

अर्धोन्मीलितलोचनस्य पिबतः पर्याप्तमेकं स्तनं
सद्यः प्रस्नुतदुग्धदिग्धमपरं हस्तेन संमार्जता(त?ः) ।
मात्रा चाङ्गुलिचालितस्य चिबुकस्मेरायमाने मुखे
विष्णोः क्षीरकणाम्बुधामधवला दन्तद्युतिः पातु वः ॥५६ ॥

गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किन्त्वेवं विजनस्थयोर्हतजनाः संभावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचिततवृथावस्थानखेदालसा-
माश्लिष्यन्पुलकोत्करान्चितनुर्गोपीं हरिः पातु वः ॥ ५७ ॥

दृप्यद्दैत्यकुदुम्बिनीजनमनःसन्तोषसङ्कोचनः
कुर्याद्विश्वम(न)श्वरं स भगव(वा)न्कोलावतारो हरिः ।
यद्दंष्ट्राङ्कुरकोटिकोटरकुटीकोणान्तरस्थेयसी
पृथ्वी भात्यवदातकेतकदले लीनेव भृङ्गाङ्गना ॥ ५८ ॥

अथ लक्ष्म्याः--

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्य नीतं वपुरलसलसद्बाहु ल्याः(लक्ष्म्याः) पुनातु ॥५९॥

पायात्पयोधिदुहितुः कपोलामलचन्द्रमाः ।
यत्र संक्रान्तबिम्बेन हरिणा हरिणायते ॥ ६० ॥

अथ सूर्यस्यः—

सिन्दूरस्पृहया स्पृशन्ति किरणं कुम्भस्थमाधोरणा
भिल्ली पल्लवशङ्कया विचिनुते सान्द्रं द्रुमद्रा(द्रो?)णिषु ॥
कान्ताः कुङ्कुमशङ्कया करतले मृद्नन्ति लग्नं च यत्-
तत्तेजः प्रथमोद्भवं भवकरं सौरं चिरं पातु वः ॥ ६१ ॥

अथान्योक्तयः। तत्रादौ सूर्यस्य ।

यत्पादाः शिरसा न केन विधृताः पृथ्वीधृतामग्रजे(भृतां मध्यतः)
तस्मिन्भास्वति राहुणा कवलिते लोकत्रयीचक्षुषि ।
खद्योतैः स्फुरितं तमोभिरुदितं ताराभिरुज्जृम्भितं
घूकैरुत्थितमाः किमत्र करवै किं केन नो चेष्टितम् ॥ ६२ ॥

तस्यैवाभ्युदयो भूयाद्भानोर्यस्योदये सति ।
विकासभाजो जायन्ते गुणिनः कमलाकराः ॥ ६३ ॥

देवो हरिर्वहति वक्षसि कौस्तुभं वा (त-)
तन्व्येव(मन्येव) काचन पुनर्द्युमणेः प्रतिष्ठा ।
यत्पादसंगतिसमर्पितसौरभाणि
धत्ते स एव शिरसा सरसीरुहाणि ॥ ६४ ॥

करान्प्रसार्य रविणा दक्षिणाशावलम्बना ।
न केवलं मनोरा(लॅमनेनात्मा)दिवसोपि लघी(घू)कृतः ॥ ६५ ॥

गते तस्मिन्भानौ त्रिभुवनसमुन्मेषविरह—
व्यथां चन्द्रो नेष्यत्यनुचितमितो नास्ति किमपि ।
इदं चेतस्तापं जनयतितरामत्र यदमी
प्रदीपाः संजाताति(स्ति?)मिरहृदि रद्दोधुर(?)शिखाः ॥ ६६ ॥

पातः पूष्णो महति भवते(भवति महते) नोपतापाय यस्मात्
कालेनास्तं क इह न गता यान्ति यास्यन्ति चान्ये ।
एतावत्तु व्यथयति यदालोकबाह्यैस्तमोभि-
स्तस्मिन्नेव प्रकृतिमहति व्योम्नि लब्धोऽवकाशः ॥ ६७ ॥

अथ चन्द्रस्य—

हरमुकुटे सुरतटिनीनिकटास्थितिलोभतो द्विजेन्द्रेण ।
अपि गरलं फणिफूत्कृतिरीक्षणतीक्ष्णाशुशुक्षाणिः क्षान्तः ॥ ६८ ॥

विरम तिमिर साहसार(द)मुष्माद्यादे रविरस्तमितो गतस्ततः किम् ।
कलयासि न पुरो महोत्सवोर्मिद्युतिनिधिरभ्युदिता (तो) यमं(?)
शशाङ्कः ॥ ६९ ॥

अहो नक्षत्रराज्ञ(ज)स्य साभिमानविचेष्टितम् ।
परिक्षीणस्य वक्रत्वं संपूर्णस्य च वृत्तता ॥ ७० ॥

आलोकवन्तः सन्त्येव भूयांसो भास्करादयः ।
कलावानेव तु ग्रावद्रावकर्मणि कर्मठः ॥ ७१ ॥

शिरसा धार्यमाणोपि सोमः सौम्येन शंभुना ।
तथापि कृशतां धत्ते कष्टः खलु पराश्रयः ॥ ७२ ॥

लब्धं जन्म सह श्रिया श्रियमपि त्रैलोक्यभूषाकर-
स्थित्यर्थं परमेश्वरोभ्युपगतस्तेनापि मूर्ध्ना कृतः ।
वृद्धिं शीतकरस्तथापि न गतः क्षीणः परं प्रत्युत
प्रायः प्राक्तनमेव कर्म बलवत्कः कस्य कर्तुं क्षमः ॥ ७३ ॥

पीयूषं वपुषोस्य हेतुरुदयो विश्वस्य नेत्रोत्सवः
प्लुष्टं भानुकरैरिदं त्रिभुवनं ज्योत्स्नाभि(क)रैः सिञ्चति ।
सर्वाशाप्रतिरोधकान्धतमसो ध्वंसाय बद्धोयमे

धिग्धातारमिहापि लक्ष्म लिखितुं यस्य(स्या)द्य वृत्तं मनः ॥ ७४ ॥

वायोः—

अलिपटलैरनुयातां सहृदयहृदयज्वरं विलुम्पन्ति(न्तीम्) ।
मृगमदपरिमललहरीं समीर किं पामरेषु रे किरसि ॥ ७५ ॥

कोयं भ्रान्तिप्रकारस्तव पवन पदं लोकपादाहतानां
तेजास्विव्रातसेव्ये नभसि नयसि यत्पांसुपूरं प्रतिष्ठाम् ।
अस्मिन्नुत्थाप्यमाने जननयनपथोपद्रवस्तावदास्तां
केनोपायेन सद्यो वपुषि कलुषतादोष पि(ए)ष त्वयैव ॥ ७६ ॥

ये जात्या लघवः सदैव गणनां याता न ये कुत्रचित्
पद्भ्यामेव विक(म)र्दिताः प्र(ति)दिनं भूमौ विलीनाश्चिरम् ।
उत्क्षिप्ताश्वपलाशयेन मरुता पश्यान्तरिक्षे सखे
तुङ्गानामुपरि स्थितिं क्षि(ति)भृतां कुर्वन्ति ते पांसवः ॥ ७७ ॥

मेघस्य—

एकस्य तस्य मन्ये धन्यामभ्युंद(भ्युन्न)तिं जलधरस्य ।
विश्वं सशै(ल)काननमाननमवलोकते यस्य ॥ ७८ ॥

प्रावृषेण्यस्य मालिन्यं को दोषोभीष्टवर्षिणः ।
शारदाभ्रस्य शुभ्रत्वं वशिष्यो(वद कुत्रो)पयुज्यते ॥ ७९ ॥

जलधर जलभरानिकरैरपहर परितापमुद्धतं जगतः ।
नो चेदपसर दूरं हिमकरकरदर्शनं विक(त ?)र ॥ ८० ॥

शैलेयेषु शिलातलेषु च गिरेः शृङ्गेषु गर्तेषु च
श्रीखण्डेषु बिभीतकेषु परितः पूर्णेषु रिक्तेषु च ।
स्निग्धेन ध्वानिनाखिलेषु जगतीचक्रे समं वर्ततो
वन्दे वारिद सार्वभौमि भवतो विश्वोपकारि व्रतम् ॥ ८१ ॥

शे(शो)षं गते सरासि शैवलवल्लरीणा—
मन्तस्तामिर्लुठति तापविषेष(शोषि ?)ताङ्गः ।
अत्रान्तरे यदि न वारिद वारिवृन्दै-
राप्लावयेस्तदनु किं मृतमण्डनेन ॥ ८२ ॥

किसलयानि कुतः कुसुमानि वा
क्व च फलानि तादृ(तथा ?) वरवीरुधाम् ।
अयमकारुणि(रण)कारुणिको यदा
वितरतीह पयो न पयोधरः ॥ ८३ ॥
नभसि निरवलम्बे सीतदा(दता) दीर्घकालं
त्वदभिमुखविसृष्टोत्तानचञ्चूपुटेन ।
जलधर जलधारा दूरतस्तावदास्तां
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥ ८४ ॥

क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारमात्रोद्यताः
स्वार्थो यस्य परार्थ एव परमा(स पुमा)नेकः सतामग्रणीः ।
दुःपूरोदरपूरणाय पिबति स्रोतःपतिं वाडवो
जीमूतस्तु निदाघसंभृतजगत्संतापाविच्छित्तये ॥ ८५ ॥

आपो विमुक्ताः क्वचिदाप एव
क्वचिन्न किंचिद्गरलं क्वचिच्च ।
यस्मिन्विमुक्ताः प्रभवन्ति मुक्ताः
पयोद तस्मिन्विमुखः कुतस्त्वम् ॥ ८६ ॥

अमुं कालक्षेपं त्यज जलद गम्भीरमधुरैः
किमेभिर्निर्घोषैः सृज झटिति झाङ्कारि सलिलम् ।

अये पश्यावस्थामकरुणसमरिव्यातिकर–
ज्वलद्दावज्वालावलिजाटिलमूर्तेर्विटपिनः ॥ ८७ ॥

हंसस्य—

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते न मरालस्य मानसं मानसं विना ॥ ८८ ॥
एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ॥ ८९ ॥

रे राजहंस किमिति ज्व(त्व)मिहागतोसि
योसौ बकः स इह हंस इति प्रतीतः ।
तद्गम्यतो(ता)मनुपदेन पुनः स्वभूमौ
यावद्वदन्ति न बकं खलु मूढलोकाः ॥ ९० ॥

अपसरणमेव शरणं मौनं वा तत्र राजहंसस्य ।
कटु रटति निकटवर्ती वाचालष्टिट्टिभो यत्र ॥ ९१ ॥

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधिप्रसिद्धां ।
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ ९२ ॥

मधुकरस्य—

अपसर मधुकर दूरं परिमलबहलेपि केतकीकुसुमे ।
इह नहि मधुलवलेशो भवति परं धूलिधूसरं वदनम् ॥ ९३ ॥
इह रूपमात्रसारे भित्तिविलिखितात्रि(तेत्र चि)त्रकल्हारे ।
न रसो नापि च गन्धो मधुकरबन्धो वृथा भ्रमसि ॥ ९४ ॥
भ्रमर भ्रमता दिगन्तराले क्वचिदासेवितमीक्षितं श्रुतं वा ।
कथयस्व विहाय पक्षपातं यदि जातीकुसुमानुकारि पुष्पम् ॥ ९५ ॥
अलिरयं नलिनी(वन)वल्लभः कुमु(दि)नीकुलकेलिमदालसः ।
विधिवशेन विदेशमुपागतः कुटजपुष्परसं बहु मन्यते ॥ ९६ ॥

अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मदः(नः) सुमनोलतासु ।

मुग्धामनाम्रमरजसं कलिकामकाले
बालां कदर्थयसि किं नवमल्लिकायाः ॥ ९७ ॥

फुल्लेषु यः कमलिनीकमलोदरेषु
चूतेसि(षु) यो विलसितः कमलान्तरस्थः ।
पश्याद्य तस्य मधुपस्य शरद्व्यपाये
कृच्छ्रेण वेणुविवरे दिवसाः प्रयान्ति ॥ ९८ ॥

गौरीं चम्पककलिकामपहाय भ्रान्तदुर्बुद्धे ।
शाल्मलिकुसुमदलेषु स्वैरे(रं) गुञ्जन्न लज्जसे मधुप ॥ ९९ ॥

चातकस्य—

एक एव खगो मानी चिरं जीवति चातकः ।
म्रियते वा पिपासायां याचते वा पुरंदरम् ॥ १०० ॥

कूपे पानमधोमुखं भवति मे नद्यो वराक्यः स्त्रियः
सारङ्गैर्बकटिट्टिभैः सह सिरं(सरः) सेव्यं समालोकयन् ।
शुष्यत्तालुगतोपि कम्पिततनुः श्रुत्वा गभीरध्वनिं
धैर्यादुद्ध(द्धृ)तकन्धरो जलधर त्वां याचते चातकः ॥ १०१ ॥

कोकिलस्य—

रे रे कोकिल मा भज मौनं किंचिदुदीरय पञ्चमरागम् ।
नो चेत्त्वामिह को जानीते काककदम्बकापिहिते चूते ।।१०२॥

काकैः सह विरुद्धस्य कोकिलस्य कला गिरः ।
खलसङ्गेपि नैष्ठुर्यं कल्याणप्रकृतेः कुतः ॥ १०३ ॥

अस्यां सखे बधिरलोकनिवासभूमौ
किं कूजितेन खलु कोकिल कोमलेन ।
एते हि दैवहतकास्तदभिन्नवर्णं
त्वां काकमेव कलयन्ति कलानभिज्ञाः । १०४ ॥

यस्याकर्ण्य वचः सुधाकवलितं वाचंयमानामपि
व्यग्राणि व्यथयन्ति मन्मथकथाश्चेतांसि चैत्रोत्सवे ।

रे रे काक वराक साकममुना पुंस्कोकिलेनाधुना
स्पर्धाबन्धु(न्ध)मुपेयुषस्तव तु किं लज्जापि नो जायते ॥ १०५ ॥
रसालशिखरासीनाः शतं सन्तु पतत्रिणः ।
तन्मञ्जरीरसामोदं विदुरेव कुहूमुखाः ॥ १०६ ॥

मयूरस्य—

अये नीलग्रीव क्व नु खलु सखे तेद्य मुनयः
परं तोषं येषां तव रवविलासोर(वि) तनुते ।
अमी दूरात्क्रूराः क्वणितमिदमाकर्ण्य सहसा
त्वरन्ते हन्तुं त्वामहह शबराः पुञ्जितशराः ॥ १०७ ॥

एतस्मिन्मलयाचले बहुविधैः किं तैरकिंचित्करैः
काकोलूककपोतकोकिलरुके(रुते ?)रेकोपि पार्श्वस्थितः ।
केकी कूजति चेत्तदा विघटितव्यालावलीबन्धनः
सेव्यः स्यादिह सर्वलोकमनसामानन्दनश्चन्दनः ॥ १०८ ॥

केका कर्णामृतं ते सकुसुमकबरीकान्तिहाराः कलापाः
कण्ठच्छाया पुरारेर्गलरुचिरुचिरा सौहृदं मेघसङ्घैः ।
विश्वद्वेषिद्विजिह्वस्फुरदुरुपिशितैर्नित्यमाहारवृत्तिः
कैः पुण्यैः प्राप्तमेतत्सकलमपि सखे चित्तवृत्तं मयूर ॥ १०९ ॥

शुकस्य—

.....श्रेणीपरिवृढवृथा.. .....(?)

अमुष्मिन्नुद्याने विहगखल एष प्रतिकलं
विलोलः काकोलः क्वणति पटु या(व)त्कटुतरम् ।
सखे तावत्कीर दृ(द्र)ढय हृदि वाचं च सकलां
न मौनेन न्यूनो भवति गुणभाजां गुणगणः ॥ ११० ॥

इयं पल्ली भिल्लैरनुचितसमारम्भरसिकैः
समन्ताद्दाक्रान्ता विषविषमबाणप्रणयिभिः ।
तरोरस्य स्कन्धे गमय सभयं कीर निभृतं
न वाणी कल्याणी तदिह मुखमुद्रैव शरणम् ॥ १११ ॥

काकस्य—

कृष्णं वपुर्वहतु चुम्बतु सत्फलानि
रम्येषु संचरतु चूतवनान्तरेषु ।
पुंस्कोकिलस्य चरितानि करोतु कामं
काकः कलध्वनिविधौ खलु काक एव ॥ ११२ ॥

पाथि निपतितान्शून्ये दृष्ट्वा निरावरणान्...
दधिभृतघटान्गर्वोन्धर(?)समुद्ध(त)कन्धरः ।
निजसमुचिताश्चेष्टास्तास्ता विकारशताकुलो
यदि न कुरुते काणः काकः कदा नु करिष्यति ॥ ११३ ॥

बकस्य—

उभौ पक्षौ शुक्लौ भुवि वियति चावारितगतिः
सदा मीनान्भुङ्क्ते वसति शिरस(सकल)स्थाणुशिरसि ।
बके सर्वश्चान्द्रो गुणसमुदयः कश्चिदधिको ।
गुणाः स्थाने मान्या न तु नरवरस्थानरहिताः ॥ ११४ ॥

बकोट ब्रूमस्त्वां लघुनि श(स)रासि क्वापि शिरसि(शफरै)-
स्तव न्याय्या वृत्तिर्न पुनरथ गाढुं समुचिता (तः) ।
इतश्चेतश्चाभ्रांलिहलहरिहेलातरालित-
क्षितिध्रग्रासैकग्रहलतिमिपोतः पतिरपाम् ॥ ११५ ॥

खद्योतस्य—

अदृष्टव्यापारं गतवति दिनानामाधिपतौ
यशःशेषीभूते शशिनि गतधाम्नि ग्रहगणे ।
तथान्धं संजातं जगदुपनते मेघसमये
यथामी गण्यन्ते तमसि पटवः कीटमणयः ॥ ११६ ॥

इन्दुः प्रयास्यति विनङ्क्ष्यति तारकश्रीः
स्थास्यन्ति लीढातिमिरा न मणिप्रदीपाः ।
अन्धं समग्रमपि कीटमपो(णे) भविष्य-
त्युन्मेषमेष्यति भवानिति दूरमेतत् ॥ ११७ ॥

गजस्य—

कर्णे चामरचारुचञ्चुकलिकाः कण्ठे मणीनां गणाः
सिन्दूरप्रकराः शिरःपरिसरे पार्श्वान्तिके किङ्किणी ।
लब्धश्चेन्नृपवाहनेन कणि(रि)णा बद्धेन भूषाविधि-
स्तत्किं भूधरधूलिधूसरतनुर्मान्यो न वन्यो गजः ॥ ११८ ॥

केलिं कुरुष्व परिभुङ्क्ष्व सरोरुहाणि
गाहस्व शैलतटनिर्झरिणीपयांसि ।
भावानुरक्तकरिणीकरलालिताङ्ग
मातङ्ग मुञ्च मृगराजरणाभिलाषम् ॥ ११९ ॥

तापो नापगतस्तृषा न च कृशा धूली न धूता तनो-
र्न स्वच्छन्दमकारि केलिकवलः का नाम केलिस्पृहा ।
दूरोत्क्षिप्तकरेण हन्त करिणा स्पृष्टा न वा पद्मिनी
प्रारब्धो मधुपैरकारिणी(रण)महो झाङ्कारकोलाहलः ॥ १२० ॥

भो भोः करीन्द्र दिवसानि कियन्ति तावत्
तस्मिन्मरौ समति(वा)हय कुत्रचित्त्वम् ।
रेवाजलैर्निजकरेणुकरप्रयुक्तै-
र्भूयः शमं गमयितासि निदाघदाहम् ॥ १२१ ॥

दानार्थिनो मधुकरा यदि कर्णतालै-
र्दूरीकृताः करिवरेण मदान्धबुध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने वसन्ति ॥ १२२ ॥

अथ सिंहस्य—

मृगेभ्यो रक्ष्यते क्षेत्रं नरैस्तृणमयैरपि ।
सिंहाक्रान्तं पुनर्मूढ न हयैर्न च दन्तिभिः ॥ १२३ ॥

अस्मिन्नम्भोदवृन्दध्वनिजनितरुषि प्रेक्षमाणेन्तरिक्षं
मा काक व्याकुलो भूस्तरुशिखरशवक्रव्यलेशानशान ।
धत्ते मत्तेभकुम्भव्यतिकरकरजग्रामवज्राग्रजाय
ग्रासव्यासक्तमुक्ताधवलितकवलो न स्पृहामत्र सिंहः ॥ १२४ ॥

क्षुत्क्षामोपि जराकृशोपि शिथिलप्राणोपि कष्टां दशा-
मापन्नोपि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भदलनग्रासैकबध्दस्पृहः
किं जीर्ण तृणमत्ति मानमहतामग्रेसरः केसरी ॥ १२५ ॥

परिणतगर्भभरार्ता सिंहवधूः शल्लकीविपिने ।
अन्वेषयति मदान्धद्विरदेन सिक्तमवनितलम् ॥ १२६ ॥

मृगस्य—

दूर्वाङ्कुरतृणाहारा धन्यास्तात वने मृगाः ।
विभवोन्मत्तचित्तानां न पश्यन्ति मुखानि यत् ॥ १२७ ॥

रोमन्थमाचरय मन्थरमेत्य निद्रां
मुञ्च श्रमं तदनु संचर रे यथेच्छम् ।
दूरे स पामरजनो मुनयः किलैते
निष्कारणं हरिणपोत बिभेषि कस्मात् ॥ १२८ ॥

कालिम्ना म्र(न) गतं स्वनाम गलितं जाता कलङ्काभिधा
* * * * * त्रिभुवनं किं प्राप्तमुच्चैर्मृग ।
अस्माकं वसतां वनेपि वस(नि)तां वाञ्छन्ति नेत्रोपमां
कस्तूरीहरिणाभिधाजनि जने स्थाने विहारः स्थितिः ॥ १२९ ॥

वृक्षान्योक्तयः—

यद्यपि चन्दनविटपी विधिना फलपुष्पवर्जितो विहितः ।
निजवपुषैव परेषां तथापि संतापमपहरति ॥ १३० ॥

केचिल्लोचनहारिणः कतिपयाः सौरभ्यसंभारिणः
केप्यन्ये फलधारिणः प्रतिदिशं ते सन्तु हन्त द्रुमाः ।
धन्योयं हरिचन्दनः परिरसे(सरे) यस्य स्थितैः शाखिभिः
शाकोटादिभिरप्यहो मृगदृशामङ्केषु लीलायते(यितम्) ॥ १३१ ॥

कुसुमस्तबका नम्राः सत्येव परितो लताः ।
तथापि भ्रमरभ्रान्तिं करोत्येकैव मालती ॥ १३२ ॥

न च गन्धवहेन चुम्बिता न च पीता मधुपेन मल्लिका ।
पिहितैर(व) कठोरशाखया परिणामस्य जगाम गोचरम् ॥ १३३ ॥

सूचीभिर्दलितं वपुः कवलितं धूलीभिरायुर्दृशो-
र्नीरन्ध्रैः ककचोपमैर्दलपुंटैः पक्षद्वयं कीलितम् ।
पूर्णा एव मनोरथाः किमपरं कल्याणि कल्पायुतं
जीयाः केतकि देहि निर्गमपथं जीवत्वसौ षट्पक्षः(दः) ॥ १३४ ॥

कति पल्लविता न पुष्पिता वा तरवः सन्ति समन्ततो वसन्ते ।
जगतां विजयाय मीनकेतोः सहकारी सहकार एष एव ॥ १३५ ॥

दिङ्मण्डलं परिमलैः सुरभीकरोषि
सौन्दर्यमावहसि लोचनलोभनीयम् ।
हंहो रसाल फलवर्य तथापि दूये
यद् ग्रन्थिलं च कुटिलं च (वपु)र्बिभर्षि ॥ १३६ ॥

तालीतरोरनुपकारि फलं फालित्वा
लज्जावशादुचित एव विनाशयोगः ।
एतत्तु चित्रमुपकृत्य फलैः परेभ्यः
प्राणान्निजान् सपदि यत्कदली जहाति ॥ १३७ ॥

यद्यपि न भवति हानिः परकीयां चरति रासभे द्राक्षाम् ।
असमञ्जसं तु मत्वा तथापि खलु खिद्यते चेतः ॥१३८ ॥

दासेरकस्य दासीयं बदरी यदि रोचते ।
एतावतैव किं द्राक्षा न साक्षादमृतप्रदा ॥ १३९ ॥

विशालं शाल्मल्या नयनसुभगं वीक्ष्य सुभगं (कुसुमं)
शुकस्यासीद्बुद्धिः फलमपि भवेत्तादृशमिति ।
चिरं तत्र स्थित्वा फलमपि न काले परिणतं
विपाके तूलोन्तः सपदि मरुता सोप्यपहृतः ॥१४० ॥

उच्चैरेष तरुः फलं च पृथुलं दृष्ट्वा शुको हर्षितः
पक्वं शालिवनं विहाय जडधीस्तां नारिकेलीं गतः ।
स्थित्वा तत्र बुभुक्षितेन मनसा यत्नः कृतो भेदने
आशा तस्य न केवलं विगलिता चञ्चुर्गता चूर्णताम् ॥ १४१ ॥

मयि जीवति बीजाढ्ये किमन्ये बीजपूरकाः ।
इति संचिन्त्य मनसा विद्रद्रे दाडिमीफलम् ॥ १४२ ॥

निम्ब किं बहुनोक्तेन निष्फलानि फलानि ते ।
यानि संजातपाकानि काका निःशेषयन्ति हि ॥ १४३ ॥

गात्रं कण्टकसंकुलं प्रविरलच्छाया न चायासत्ह(न्)
निर्गन्धः कुसुमोत्करस्त्व(तव) फलं न क्ष(क्षु)द्विनाशक्षमम् ।
बबूल(बब्भूल)द्रुम मूलमेति न जनस्तत्तावदास्तामहो
अन्येषामपि शाखिनां फलवतां रक्षार्थमानीयसे ॥ १४४ ॥

किं पुष्पैः किं फलैस्तस्य करीरस्य दुरात्मनः ।
येन वृद्धिं समासाद्य न कृतः पात्रसंग्रहः ॥ १४५ ॥

किंशुके शुकमातिष्ठ चिरभाविफलाशया ।
बाह्यरङ्गप्रसङ्गेन के के नानेन वञ्चिताः ॥ १४६ ॥

अयि कमलिनि तत्ते जन्मशुद्धिः सरस्यां
परिणयनविधानं भानुना तद्विधेन ।
इति कुलयुगशुद्धौ तत्समक्षं विशङ्कं
मधुपकुलसखित्वे ब्रूहि किं ते निदानम् ॥ १४७ ॥

किं वीरुधो भुवि न सन्ति सहस्रशोन्या
यासां दलानि न परोपकृतिं भजन्ति ।
एकैव वल्लिषु विराजति नागवल्ली
या नागरीवदनचन्द्रमलंकरोति ॥ १४८ ॥

अथ पर्वतान्योक्तयः—

रोहणाचलशैलेषु कस्तुलां कुरुते तव ।
यस्य पाषाणखण्डानि मण्डनानि महीभुजाम् ॥ १४९ ॥

कुम्भोद्भवस्य करपुष्करकोशकोणे
पाथोनिधौ विधिवशाद्विपदं प्रयाते ।

ये दुर्लभास्त्रिदशलोकविलासिनीनां
ते पङ्कसीमनि महामणयो लुठन्ति ॥ १५० ॥

समुद्रस्य—

पीत्वा गर्जन्त्यपस्ते दिशि दिशि जलदास्त्वं शरण्यो गिरीणां
सुत्रामत्रासभाजां त्रिदशविटपिनां जन्मभूमिस्त्वमेव ।
गाम्भीर्यं तच्च तादृक्तव सलिलपते किंतु विज्ञाप्यमेतत्
सर्वोपायेन मैत्रावरुणिमुनिकृपादृष्टयः काङ्क्षणीयाः ॥१५१॥

रत्नैरापूरितस्यापि मदलेशोस्ति नाम्बुधेः ।
मुक्ताः कतिपयाः प्राप्य मातङ्गा मदविह्वलाः ॥ १५२ ॥

रत्नानाम्—

भ्रष्टं नृपतिकिरीटाद्भूमौ पतितं तिरोहितं रजसा ।
विधिविलसितेन रत्नं जनचरणविडम्बनं सहते ॥ १५३ ॥

मुक्ताफलस्य—

रत्नाकरे परिहृता वसतिः किमन्य-
दङ्गीकृतः कठिनवेधनदुःखभारः ।
वक्षोजकुम्भपरिरम्भणलोलुपेन
किं किं न तेन विहितं नवमौक्तिकेन ॥ १५४ ॥

शङ्खस्य—
ख

कीटगृहं कुटिलोन्तःकाठिनः क्षाराम्बुसंभवः शून्यः ।
शङ्खः श्रीपतिनिकटे केन गुणेन स्थितिं लेभे ॥ १५५ ॥
ख

तातः क्षीरि(र)निधिः स्वसा जलधिजा भ्राता सुरेशद्रुमः
सौजन्यं सह कौस्तुभेन शुचिता यस्य द्विजेशादपि ।
धिक्कर्माणि स एव कम्बुरधुना पाखण्डकान्ताकरे
विभ्रान्तः प्रतिवासरं प्रतिगृहे भैक्षेण कुक्षिंभरिः ॥ १५६ ॥

नदीनाम्—

यद्यपि दिशि दिशि सरितः परितः परिपूरिताम्भसः सन्ति ।
तदपि पुरंदरतरुणीसंगतिसुखदायिनी गङ्गा ॥ १५७ ॥

छायां प्रकुर्वान्ति नमान्ति पुष्पैः फलं नियच्छन्ति तद (था) द्रुमाये ।
उन्मूल्य तानेव नदी प्रयाति तरङ्गिणां क्व प्रतिपन्नमस्ति ॥ १५८ ॥

कतिपयदिवसस्थायी पूरो दूरोन्नतोपि भविता ते ।
तटिनि तटद्रुमपाटनपातकमेकं चिरस्थायी ॥१५९ ॥

सरोवरस्य—

(अ)यमवसरः सरस्ते सलिलैरुपकर्तुमार्थिनामनिशम् ।
इदमपि सुलभं ह्यम्भो भवति पुरो जलधराभ्युदये ॥ १६० ॥

कमलस्य—

आमूलादाकन्दापरिमलादाविकाशाश्च (?) ।
अयि कमल सेव्यसे अ(त्वम)लिभिर्मरन्देन तुन्दिलाः शरघाः ॥१६१॥

नालस्य प्रसरो जलेष्वापि कृतो वासः स्वकोशे रुचि-
र्दण्डे कर्कशता मुखेतिमृदुता मित्रे महान्प्रश्रयः ।
आमूलं गुणसंग्रहव्यसनता द्वेषश्च दोषाकरे
यस्यैषा स्थितिरम्बुजस्य वसतिर्युक्तैव तत्र श्रियः ॥ १६२ ॥

*　　*　　*　　*

*　　*　　*　　*

अथ कूपान्योक्तयः—

सगुणैः सेवितोपान्ते(न्तो) विनीतैः प्राप्तदर्शनः ।
नीचोपि कूपः सत्पात्रैर्जीवनार्थं समाश्रितः ॥ १६३ ॥

कस्तूरिकायाः—

आपि त्यक्तासि कस्तूरि पामरैः पङ्कशङ्कया ।
अलं खेदेन भूपालाः किं न सन्ति महीतले ॥ १६४ ॥

नेपालभूपालविशालभाले मृच्छारि कस्तूरिकतामुपैति।
अन्य(त्र) सैषा विपरीतभावं स्थानं प्रधानं खलु योग्यतायाः ॥ १६५॥

आरभ्य सौरभ्यकथासु मौनं मालिन्यमात्रे वचसोवकाशः ।
दुर्लील * * पतिपुत्रहस्ते कस्तूरि कस्ते वद दुर्विपाकः ॥ १६६ ॥

जन्मस्थानं न खलु विमलं वर्णनीयो न वर्णो
दूरात्पुंसां वपुषि रचना पङ्कश(ङ्कां) करोति ।
यद्यप्येवं सकलसुराभिद्रव्यवर्गा(गर्वा?)पवर्गो(र्गः)
को जानीते परिमलगुणः कोपि कस्तूरिकायाः ॥ १६७ ॥

अथ जलस्य—

शैत्यं नाम गुणस्तवैव तदनु स्वाभाविकी स्वच्छता
किं ब्रूमः शुचितां व्रजन्त्यशुचयः सङ्गेन यस्यापरे ।
किं वातः परमास्तुषे स्तुतिपरं संजीवनं जीवतां
त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां विरोद्धुं क्षमः ॥ १६८ ॥

प्रकीर्णान्योक्तयः—

युक्तोसि भुवनभारे मा वक्रां वितनु कन्धरां शेष ।
त्वय्येकस्मिन् दुःखि(नि) सुखितानि भवन्ति भुवनानि ॥ १६९ ॥

दामोदरमुदराहितभुवनं यो वहति लीलया गरुडः ।
कस्य तनोरुपरिष्टो खिन्नोसौ खेदमपनयतु १७० ॥

द्वात्रिंशद्दशनद्वेषिमध्ये भ्रमसि नित्यशः ।
तदिदं शिक्षिता केन जिह्वे संचारकौशलम् ॥ १७१ ॥

भ्रातः काञ्चनलेपगोपितबहिस्ताम्राकृते सर्वतो
मा भैषीः कलश स्थिरो भव चिरं देवालयस्योपरि ।
ताम्रत्वं गतमेव काञ्चनमयी कीर्तिः स्थिता तेधुना
नान्तस्तत्त्वविचारणप्रणयिनो लोका बहिर्बुद्धयः ॥ १७२ ॥

दीर्घा नदी शिथिलबन्धविलम्बिनौ नौ-
रभ्युन्नता जलमुचो विषमः समीरः ।
आरुद्धवान्निजयितो ध्वनिनः * * *
सत्कर्णधा(र कु)रु यत्सदृशं कुलस्य ॥ १७३ ॥

मलोत्सर्गे गजेन्द्रस्य मूर्ध्नि काकः करोति यः ।
कुलानुरूपं तत्तस्य यो गजो गज एव सः ॥ १७४ ॥

आकर्ण्य गर्जितरवं घनगर्जतुल्यं
सिंहस्य यान्ति वनमन्यमि(दि)हा(भा) भयार्ताः ।
तत्रैव पौरुषनिधिः स्वकुलेन सार्धं
दर्पोद्धुरो वसति वीतभयो वराहः ॥ १७५ ॥

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हासिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥ १७६ ॥

अमी तिलास्तैलिक नूनमेतां स्नेहादवस्थां भवतोपनीताः ।
द्वेषो भविष्यद्यदमीषु नूनं तदा न जाने किमु वाकरिष्यः ॥ १७७ ॥

कूर्मः—

नो चुम्बनं न चटु यद्यपि भाषितं वा
नाङ्के स्थितिर्न परिरम्भणमेवमेव ।
दृष्ट्वैव कूर्मरमणी रमणीयभावात्
स्तन्यं विनैव परिपोषयति स्म बालान् ॥ १७८ ॥

कुम्भः—

कुद्दालेन विदारणं तदुपरि(तत् ?)र्दुःखं खरारोहणं
तत्पापिष्ठकुलालपादहननं चक्रभ्रभस्तादृशः ।
दाहोग्नेर्मम दुःखदो न हि तथा सर्वंसहा पाहि मे (?)
ग्राम्यस्त्रीकरपृष्ठताडनमहो ह्येतच्च दुःखावहम् ॥ १७९ ॥

कार्पासः—

सेहे वातजलप्रतापतपनप्रोद्दामदाहव्यथां
पश्चादस्थिवियोजितोऽथ मुदितो यन्त्रे चिरं भ्रामितः ।
कार्पासो गुणजामवाप्य सहसा जातः स्वयं कञ्चुकी
वक्षोजं परिरब्धुमेष कृतवान् किं किं न कर्माद्भुतम् ॥ १८० ॥

हारः—

अन्योपि सन्ति गुणिनः कति नो जगत्यां
हार त्वमेव गुणिनामुपरि स्थितोसि ।
एणीदृशामुरसि नित्यमवस्थिता(तः) च ।
सद्वृत्तता च शुचिता च न खण्डिता च ॥ १८१ ॥

मीनस्य—

जलाधीनं हि मीनस्य जीवितं जीवितावधि ।
मीनो जगच्च जानाति जलं जानाति वा न वा ॥ १८२ ॥

दासेरकः—

दासेरकस्य दासीयं बदरी यदि रोचते ।
एतावतैव किं द्राक्षा न साक्षादमृतास्पदम् ॥ १८३ ॥

दुन्दुभिः—

चर्मणा समवगुण्ठताननो रज्जुबन्धनकदर्थितोपि सन् ।
ताडितोपि लगुडेन निष्ठुरं भण्ड डिण्डिम नदन्न लज्जसे ॥ १८४ ॥

यूथी—

यूथि यथोचितविधिना विधेयमातिथ्यमेतस्य ।
माधविकाप्राणपतिः प्राघुणिकस्ते घुणाक्षरन्यायात् ॥ १८५ ॥

निम्बः—

चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
जातो दैवादहह सहसा संविधाता विधाता ।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनविधा(धौ) कोविदः काकलोकः ॥ १८६ ॥

कनकम्—

अहो कनकमाहात्म्यं व्याख्यातुं केन शक्यते ।
नामसाम्यादहो चित्रं धत्तूरोपि मदप्रदः ॥ १८७ ॥

विषस्य—

अहमेव गुरुः सुदारुणानामिति हालाहल तात मा स्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेस्मिन्वचनानि दुर्जनानाम् ॥१८८॥

शङ्खः—

रत्नाकरस्तव सुता(पिता) भवतोतु(नु)षङ्गाद्
विश्वं पवित्रितामिदं सलिलेन यस्य ।
* * * कुटिलत्वमन्तः
किं कारणं वदसि शङ्ख दृदं(?) न विद्मः ॥१८९॥

पाञ्चजन्यकुलोद्भूतामिति शङ्खं महाजनाः ।
पूजयन्त्यास्थिसामान्यं स्थापयित्वाग्रतो हरेः ॥ १९० ॥

सर्पस्य—

द्विजिह्वान् दुर्वर्णानसुकृतिसुवर्णादृतमतीन्
समुद्गीर्णक्ष्वेडारवजनितपीडानवचनान् ।

जगत्प्राणाहारान् श्रुतिविरहिणो वक्रिमगतीन्
(वहन्) कर्णोपान्ते शिव कथमिव त्वं वद शिवः ॥ १९१ ॥

अन्तर्लापिका—

(का कान्ता) कालियारातेः पुनरर्थे किमव्ययम् ।
किं वन्द्यं सर्वलोकानां फलेषु च किमुत्तमम् ॥ १९२ ॥

वर्णो यस्य विराजते जलनिधिं योसौ बबन्ध क्षक्षा(णा)-
द्यो लङ्केशशिरोच्छिनद्वसुमतीं व्यापुर्यदीयाः शराः ।
तं वन्दे रघुनन्दनं यदनुगा रक्षांस्यनु(वा ?)घ्नन् बला-
ज्जम्बूवज्जलबिन्दुवज्जलजवज्जम्बालवज्जालवत् ॥ १९३ ॥

किंवद्भाति हरिस्तदीयगलके मुक्तामयी भासते ।
माला नेत्रयुगं विभाति च कथं * * * * ॥ १९४ ॥

द्वितीयोऽध्यायः

राजनीतिः

राजनीतेर्नृपाश्रयत्वात्प्रथमं नृपलक्षणमाह—

शास्त्राय गुणसंयोगः शास्त्रं विनयवृत्तये ।
विद्याविनीतो नृपतिः सतां भवति संमतः ॥ १ ॥

मेधावी मतिमान्दीनवदनो दक्षः क्षमावान् ऋजु-
र्धर्मात्माप्यनसूयको लघुकरः षाड्गुण्यविच्छक्तिमान् ।
उत्साही पररन्ध्रवित्कृतधृतिर्वृद्धिक्षयस्थानवित्
शूरो न व्यसनी स्मरत्युपकृतं वृद्धोपसेवी च यः ॥ २ ॥

बुद्धिशस्त्रः प्रकृत्यङ्गो धनसंवृतिकञ्चुकः ।
चारेक्षणो बृहन्मुखः पुरुषः कोपि पार्थिवः ॥ ३ ॥

वाग्मी प्रगल्भ्यः(लभः) प्र(स्मृ)तिमानुदग्रो बलवान्वशी ।
नेता दण्डस्य निपुणः कृतशिल्पः सुविग्रहः ॥ ४ ॥

पराभियोगप्रसहो दृष्टसर्वप्रतिक्रियः ।
परच्छिद्रानुपेक्षी च संधिविग्रहतत्त्ववित् ॥ ५ ॥

गूढमन्त्रप्रचारश्च देशकालविभागवित् ।
आदाता सम्यगर्थानां विनियोक्ता च पार्थिवः ॥ ६ ॥

क्रोधलोभभयद्रोहस्तम्भचापलवर्जितः ।
वृद्धोपदेशसंपन्नः शक्तो मधुरदर्शनः ॥
निर्वृतः पितरीवास्ते यत्र लोकः स पार्थिवः ॥ ७ ॥

आत्मसंपद्गुणैः सम्यक्संयुक्तं युक्तकारिणम् ॥
पर्जन्यमिव राजानं प्राप्य लोकोभिवर्धते ॥ ८ ॥

साधु भूतलदेवत्वं दुरापमकृतात्मभिः ॥
आत्मसंस्कारसंपन्नो राजा भवितुमर्हति ॥ ९ ॥

लोकाधाराः श्रियो राज्ञां दुरापा दुष्परिग्रहाः ।
निष्ठन्त्याप इवाधारे चिरमात्मनि संस्कृते ॥ १० ॥

कुलं सत्वं वयः शीघ्रं दाक्षिण्यं क्षिप्रकारिता ।
अविसंवादिता सत्यं वृद्धसेवा कृतज्ञता ॥ ११ ॥

दैवसंपन्नताबुद्धिरक्षुद्रपरिवारता ।
शक्यसामन्तता चैव तथा च दृढभक्तिता ॥ १२ ॥

दीर्घदर्शित्वमुत्साहः शुचिता स्थूललक्षिता ।
विनीतता धार्मिकता गुणाः साध्याभिगामिनः ॥ १३ ॥

गुणैरेतैरुपेतः सन्सुव्यक्तमभिगम्यते ।
तथा च कुर्वीत यथा गच्छेल्लोकाभिगम्यताम् ॥ १४ ॥

अन्यच्च विष्णुधर्मोत्तरे सुंज(नृप ?)लक्षणमाह—

सर्वलक्षणलक्षण्यो विनीतः प्रियदर्शनः ।
अदीर्घसूत्रो धर्मात्मा जितक्रोधो जितेन्द्रियः ॥ १५ ॥

ब्रह्मण्यश्चाविसंवादी दृढभक्तिः प्रियंवदः ।
अलोलुपः संयतवाग्गम्भीरः प्रियदर्शनः ॥ १६ ॥

नातिदण्डो न निर्दण्डश्चारचक्षुरजिह्मगः
व्यवहारे समः प्राप्ते पुत्रेण रिपुणा सह ॥ १७ ॥

रथे गजे च धनुषि व्यायामे च कृतश्रमः ।
उपवासतपःशीलो यज्ञयाजी गुरुप्रियः ॥ १८ ॥

मन्त्रिसांवत्सराधीनः समरेष्वनिवर्तकः ।
पूज्ये पूजयिता नित्यं दण्ड्ये दण्डयिता तथा ॥ १९ ॥

षाड्गुण्यस्य प्रयोक्ता च शक्त्युपेतस्तथैव च ।
नाहंवादी न निर्द्वन्द्वो न यत्किंचनकारकः ॥ २० ॥

कृते कर्मण्यमात्यानां कर्तामात्यजनप्रियः ।
संगृहीतजनस्तब्धः प्रसन्नवदनः सदा ॥ २१ ॥

सदा भृत्यजनावेक्षी क्रोधी (च ?) सुमहामनाः ॥ २२ ॥

षाड्गुण्यस्य प्रयोक्तेत्युक्तं तानेव षड्गुणानाह—

संधिश्च विग्रहश्चैव यानमासनमेव च ।
द्वैधीभावः संश्रयश्च षाड्गुण्यं परिकीर्तितम् ॥ २३ ॥

पणबन्धः स्मृतः संधिरपकारस्तु विग्रहः ।
जिगीषोः शत्रुविषये यानं यात्राभिधीयते ॥ २४ ॥

विग्रहेपि स्वके देशे स्थितिरासनमुच्यते ।
मारणं रध(न्ध्र)लाभस्तु द्वैधीभावस्तदुच्यते ।
उदासीने मध्यमे वा संश्रयात्संश्रयः स्मृतः ॥ २५ ॥

तेषां प्रयोगकालमाह—

समेन संधिरन्वेष्यो हीनेन च बलीयसा ।
हीनेन विग्रहः कार्यः स्वयं राज्ञा बलीयसा ॥ २६ ॥

तत्रापि तस्य पार्ष्णिस्तु बलीयान्न समाश्रयेत् ।
आसीनः कर्मविच्छेदी शक्यः कर्तुं रिपुर्यदा ॥ २७ ॥

अशुद्धपार्ष्णिर्बलवान् द्वैधीभावं समाश्रयेत् ।
बलिना विगृहीतस्तु यो संधेयेन पार्थिवः ॥ २८ ॥

संश्रयस्तेन कर्तव्यो गुणानामधमो गुणः ।
बहुक्षयव्ययायासं तेषां यानं प्रकीर्तितम् ॥ २९ ॥

बहुलाभकरं वा स्यात्तदा यानं समाश्रयेत् ।
सर्वशक्तिविहीनस्तु तदा कुर्यात्तु संश्रयम् ॥ ३० ॥

एवं च बोद्धा नृपतिर्गुणानां काले च देशे च तथा विभागे ।
समाश्रयेद्भार्गववंशमुख्य एतावदुक्तं नृपतेस्तु कार्यम् ॥ ३१ ॥

इति राजलक्षणम् । एवंविधैर्लक्षणैर्यु(क्तो)भिषिक्तो राजा राज्यं कुर्यात् ।

तद्राज्यं कीदृशमीदृशमित्याह—

स्वाम्यमात्यसुहृत्कोषदेशदुर्गबलानि च ।
स्वाम्यमात्यो जनपदो दुर्गं दण्डस्तथैव च ॥ ३२ ॥

कोशो मित्रं च धर्मज्ञः सप्ताङ्गं राज्यमुच्यते ।
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्तितः ॥ ३३ ॥

तन्मूलत्वात्तथाङ्गानां स तु रक्ष्यः समन्ततः ॥ ३४ ॥

राज्यस्य सहायाधीनत्वात्सहायस्वरूपमाह—

अभिषेकार्द्रशिरसा राज्ञा राज्यावलोकिना ।
सहायावरणं कार्यं तत्र राज्यं प्रतिष्ठितम् ॥ ३५ ॥

यद्यप्यल्पतरं कर्म तदप्येकेन दुष्करम् ।
पुरुषेण(णा)सहायेन किमु राज्यं महोदयम् ॥३६ ॥

तस्मात्सहायान्वरयेत्कुलीनान्नृपतिः स्वयम् ।
शूरान्कु(न्कु)लीनजातीयान्बलयुक्तान् क्रियान्वितान् ॥ ३७ ॥

रूपसत्त्वगुणोपेतान्सज्जनान्क्षमयान्वितान् ।
क्लेशक्षमान्महोत्साहान्धर्मज्ञांश्च प्रियंवदान् ॥ ३८ ॥

हितोपदेशकान्राज्ञः स्वामिभक्तान्यशोर्थिनः ।
एवंविधान्सहायांश्च शुभकर्मसु योजयेत् ॥ ३९ ॥

याज्ञवल्क्योऽपि—

स मन्त्रिणः प्रकुर्वीत राजा मौलान्स्थिरान् शुचीन् ।
तैः सार्धं चिन्तयेद्राष्ट्रं विप्रेणाथ ततः स्वयम् ॥ ४० ॥

निवर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः ।
तावतोतन्द्रितान्दक्षान्प्रकुर्वीत विचक्षणान् ॥ ४१ ॥

तेषां विनियोगमाह—

तेषां मध्ये नियुञ्जीत शूरान्दक्षान् कुलोद्भवान् ।
शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने ॥ ४२ ॥

धार्मिकान्धर्मकृत्येषु अर्थकार्येषु पण्डितान् ।
क्लीबान्स्त्रीषु नियुञ्जीत नीचान्नीचेषु कर्मसु ॥ ४३ ॥

अध्यक्षान् विविधान् कुर्यात्तत्र तत्र विपश्चितः ॥ ४४ ॥

सप्ताङ्गं राज्यमित्युक्तं तत्र स्वामिलक्षणस्योक्तत्वादमात्यलक्षणमाह—

प्रै(प्रे)ख(क्ष)कः पाठकश्चैव गणकः प्रतिबोधकः ।
गूढमन्त्रश्च तत्वज्ञो कालज्ञो दृष्टवित्तथा ॥ ४५ ॥

पितृमातामहाभिज्ञः स्मृतिसिद्धान्तगोचरः ।
संधिविग्रहविद्वांश्च मन्त्री ह्येष प्रकीर्तितः ॥ ४६ ॥

मन्त्रिणश्च ब्राह्मणादयः कार्याः ।तदेवाह । अन्यत्रामात्यलक्षणं विष्णुधर्मोत्तरे—

सर्वलक्षणलक्षण्यो मन्त्री राज्ञस्तथा भवेत् ।
ब्राह्मणो वेदतत्त्वज्ञो विनीतः प्रियदर्शनः ॥ ४७ ॥

स्थूललक्ष्यो महात्मा च स्वामिभक्तः प्रियंवदः ।
बृहस्पत्युशनःप्रोक्तं नीतिं जानाति तत्त्वतः ॥ ४८ ॥

रागद्वेषेण यः कार्यं न च हन्ति महीक्षितः ।
लोकापवादाद्राजार्थे भयं यस्य न जायते ॥ ४९ ॥

क्लेशक्षमस्तु धर्मात्मा विजितात्मा जितेन्द्रियः ।
गूढमन्त्रश्च तत्त्वज्ञः प्राज्ञो भक्तजनप्रियः ॥ ५० ॥

इङ्गिताकारतत्त्वज्ञ ऊहापोहविशारदः ।
शूरश्च कृतविद्यश्च न च मानी विमत्सरः ॥ ५१ ॥

चारप्रचारकुशलः प्राणिभिः प्रणयात्मकः ।
षाड्गुण्यविधितत्त्वज्ञश्चोपायकुशलस्तथा ॥ ५२ ॥

वेत्ता विधाता कार्याणां नैव कार्यातिपातिता ॥
समश्च राजभृत्यानां तथैव च गुणप्रियः ॥ ५३ ॥

कालज्ञः समयज्ञश्च कृतज्ञश्च जनाप्रियः ॥
यथानुरू(प)महार्णां पुरुषाणां नियोजिता ॥ ५४ ॥

राज्ञः परोक्षे कार्याणि संपराये भृगूद्वह ॥
कृत्वा निवेदिता राज्ञि कर्मणां गुरुलाघवम् ॥ ५५ ॥

शत्रुमित्रविभागज्ञो विग्रहस्य च तत्त्ववित् ॥
स राज्ञः सर्व कार्याणि कुर्याद् भृगुकुलोद्वह ॥ ५६ ॥

विदितानि तथा कुर्यान्न(न्ना)ज्ञातानि महीक्षितः ॥
अज्ञातानि नरेन्द्रस्य कृत्वा कार्याणि भारत ।
अचिरेणापि विद्वेषं मन्त्री समधिगच्छसि(ति) ॥ ५७ ॥

करोति यश्च कार्याणि विदितानि महीपतेः ।
भेदो न तस्य भवति कदाचिदपि भूभुजा ॥ ५८ ॥

एवंगुणो यस्तु भवेच्च मन्त्री
वाक्ये च तस्याभिरतिश्च राज्ञः ।
राज्यं स्थिरं स्याद्विपुला च लक्ष्मी-
र्यस्य च(वँशस्य?) दीप्तिर्भुवनत्रयेपि ॥ ५९ ॥

इति अमात्यलक्षणम्। अथैतादृशामात्यनियोजने राज्ञः कार्यासिद्धिरन्यथा कार्यहानिरधर्मश्चेत्याह कामन्दकः—

राज्ञा नियोजितेमात्ये राज्ञः सन्ति त्रयो गुणाः।
यशः स्वर्गनिवासश्च पुष्टचे(पुष्टश्चैव) धनागमः॥ ६०॥
मूर्खे नियोजितेमात्ये त्रयो दोषा महीपतेः।
अयशः कर्महानिश्च नरके पतनं ध्रुवम्॥ ६१॥

तस्मान्महीपतिः सम्यग् विचार्य च पुनः पुनः।
गुणवन्तं नियुञ्जीत गुणहीनं न योजयेत्॥ ६२॥

अमात्यैर्व्यसनोपैतैर्ह्रियमाणो महीपतिः।
अशक्त एवोत्पतितुं छिन्नपक्ष इवा(ण्ड)जः॥ ६३॥

कामन्दकः—

व्यसनस्य प्रतीकारो राज्ञि राज्याभिषेचनम्।
आयव्ययौ दण्डनीतिरमात्यप्रतिषेधनम्॥
इत्यमात्यस्य कर्मेदं हन्ति स व्यसनान्वितः॥ ६४॥

मन्त्रिणश्च ब्राह्मणादयः कार्यास्तदेवाह—

सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता।
मन्त्रयेत् परमं मन्त्रं राजा षाड्गुण्यसंयुतम्॥ ६५॥

अन्यानपि प्रकुर्वीत शुचीन्प्राज्ञानवस्थितान्।
सम्यगर्थं समाहर्तुं सामान्यान्सुपरीक्षितान्॥ ६६॥

मौलान् शास्त्रविदः शूरालुब्धलक्षान् कुलोद्भवान्।
सचिवान् सप्त वा राजा कुर्वीत सुपरीक्षितान्॥ ६७॥

कुलीनाः शुचयः शूराः श्रुतवन्तो न रागिणः।
दण्डनेः(दण्डनीतेः) प्रयोक्तारः सचिवाः स्युर्महीपतेः॥ ६८॥

अन्तःसारैरकुटिलैः सद्वृत्तैः सुपरीक्षितैः।
मन्त्रिभिर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरम्॥ ६९॥

अभ्रृण्वन्नपि बोद्धव्यो मन्त्रिणा पृथिवीपतिः ।
यथा स्वदोषनाशाय विदुरेणाम्बिकासुतः ॥ ७० ॥

मि(स्मृ)तिसारेपि--

स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चयः ।
दृढता मन्त्रगुप्तिश्च मन्त्रिसंपत्प्रकीर्तिते(ता) ॥ ७१ ॥

अमात्यो राजपुत्रश्च भुजावेतौ महीपतेरिति राजपुत्रस्यापि अमात्र(त्य)मध्ये परिगणितत्वात् प्रसङ्गतः पुत्रशिक्षामाह—

प्रजार्थं श्रेयसे राजा कुर्वीतात्मजरक्षणम् ।
लोलुभ्यमानास्तेर्थेषु हन्युरेनमतन्द्रिताः ॥ ७२ ॥

आ(चा)र्य(र्यै)श्चार्यकर्तव्यं नित्ययुक्तैश्च रक्षणम् ।
धर्मार्थकामशास्त्राणि धनुर्वेदं च शिक्षयेत् ॥ ७३ ॥

रथे च कुञ्जरे चैनं व्यायामं कारयेत्तदा ।
शिल्पानि शिक्षते(ये)दाप्तैर्नास्य मिथ्याप्रियं वदेत् ॥ ७४ ॥

न चास्य सङ्गः दातव्यः क्षुद्रलब्धावमानितैः ।
तथापि विनयेदेनं यथा यौवनगोमुखे ॥ ७५ ॥

इन्द्रियैर्नावकृष्येत सतां मार्गात्सुदुर्गमात् ।
गुणाधानमशक्यं तु यस्य कर्तुं स्वभावतः ॥ ७६ ॥

बन्धनं तस्य कर्तव्यं गुप्ते देशे सुखान्वितम् ।
अविनीतकुमारं हि कुलमाशु विनश्यति ॥ ७७ ॥

अधिकारेषु सर्वेषु विनीतं विनियोजयेत् ।
आदौ स्वल्पे ततः पश्चात्क्रमेणापि बृहत्स्वपि ॥ ७८ ॥

कामन्दकोपि--

राजपुत्रा मदोद्भूता गजा इव निरङ्कुशाः ।
भ्रातरं स्वामिनं घ्नन्ति पितरं चातिमानिनः ॥ ७९ ॥

राजपुत्रैर्मदोद्भूतैः प्रार्थ्यमानमितस्ततः ।
दुःखेन रक्ष्यं राज्यं हि व्याघ्राघ्रातमिवाविषः(मिषम्) ॥ ८० ॥

रक्ष्यमाणा यदि च्छिद्रं कथंचित्प्राप्नुवन्ति ते ।
सिंहशावा इव घ्नन्ति ते हि राज्यमसंशयम् ॥ ८१॥

पितरं स्वमसंशयमित्यपि पाठः ।

इति राजपुत्रशिक्षा । प्रसङ्गाद्राजपुत्रस्य कृत्यमाह—

पितृसेवापरास्तिष्ठेत्कायवाङ्मानसैः सदा ।
तत्कर्म कुर्यान्नियतं येन तुष्टो भवेत्पिता ॥ ८२ ॥

तन्न कुर्याद्येन पिता मनागपि विषीदति ।
यस्मिन्पितुर्भवेत्प्रीतिः स्वयं तस्मिन्प्रियं चरेत् ॥ ८३ ॥

यस्मिन्द्वेषं पिता कुर्यात्स्वस्यापि द्वेष्य एव सः ।
असंमतं विरुद्धं च स्वयं नैव समाचरेत् ॥ ८४ ॥

प्राप्यापि युवराजत्वं प्राप्नुयाद्विकृतिं न च ।
स संपत्तिमदाच्चैव मातरं पितरं तथा ॥ ८५ ॥

भ्रातरं भगिनीं चापि अन्यान्वा राजवल्लभान् ।
महाजनांस्तथा राष्ट्रे नावमन्येन्न पीडयेत् ॥ ८६ ॥

प्राप्यापि महतीं वृद्धिं वर्तेत पितुराज्ञया ।
पुत्रस्य पितुराज्ञा हि परमं भूषणं स्मृतम् ॥ ८७ ॥

सोदरेषु च सर्वेषु नाधिक्यं संप्रदर्शयेत् ।
भ्रातॄणामवमानेन बहवो हि विनाशिताः ॥ ८८ ॥

पितुराज्ञोल्लङ्घनेन प्राप्यापि पदमुत्तमम् ।
तस्माद्भ्रष्टा भवन्तीह दासवद्राजपुत्रकाः ॥ ८९ ॥

एवं गृहाविरोधेन राजपुत्रो वसन्गृहे ।
त्यागी च सत्त्वसंपन्नः सर्वान्कुर्याद्वशे स्वके ॥ ९० ॥

शनैः शनैः प्रवर्धेत शुक्लपक्षमृगाङ्कवत् ।
एवं वृत्तो राजपुत्रो राज्यं प्राप्याप्यकण्टकम् ।
सहायवान्महामात्यश्चिरं भुङ्क्ते वसुंधराम् ॥ ९१ ॥

सहायाः पूर्वोक्ता ज्ञेयाः । इति राजपुत्रकृत्यनिरूपणम्—

विनयोपग्रहान्भू(भू?)त्यै कुर्वीत नृपतिः सुतान् ।
विनीतमौरसं पुत्रं यौवराज्येभिषेचयेत् ॥ ९२ ॥

इति अनेन विनीतस्यैव राज्याधिकारे सिद्धे पुनर्विनीत प्रत्याह—

राजपुत्रः स दुर्वृत्तः परित्यागं हि नार्हति ।
क्लिश्यमानः स पितरं परानाश्रित्य हन्ति हि ॥ ९३ ॥

व्यसने सज्जमानं हि क्लेशयेद्व्यसनाश्रयैः ॥ ९४ ॥

इति सप्रसङ्गममात्यनिरूपणम् । सुहृदः—

नृपस्य ते हि सुहृदस्त एव गुरवो मताः ।
य एनमुत्पथगतं वारयन्त्यनिवारिताः ॥ ९५ ॥

सज्जमानमकार्येषु सुहृदो धारयन्ति ये ।
सत्यं ते नैव सुहृदो गुरवो गुरवो हि ते ॥ ९६ ॥

कोशनिरूपणम्—

वर्धमानोल्पनिस्राव(वः)ख्यातः पूजितदैवतः ।
ईक्षितद्रव्यसंपूर्णो ह्यय आप्तैरधिष्ठितः ॥ ९७ ॥

मुक्ताकनकरत्नाढ्यः पितृपैतामहोचितः ।
यत्र राजा तत्र कोशः कोशाधीना हि राजता ॥ ९८ ॥

अर्थादयं परश्चोच्चैर्लोको लोकस्य निश्चितः ।
पुमानर्थेन रहितो जीवन्नपि न जीवति ॥ ९९ ॥

यस्यार्थास्तस्य सुहृदो यस्यार्थास्तस्य पौरुषम् ।
यस्यार्थास्तस्य सर्वेपि सहायाः संभवन्ति हि ॥ १०० ॥

आपदर्थं च संरक्ष्यः कोशः कोशवता सदा ।
पुत्रादपि हि संरक्ष्यो भार्यायाः सुहृदस्तथा ॥ १०१ ॥

नान्याय्यं च व्ययं कुर्यात्प्रत्यवेक्षेत ता(चा)न्वहम् ।
कृषिवाणिज्ययोर्दुर्गसेतुः कुञ्जरवन्द(बन्ध ?)नम् ॥ १०२ ॥

खन्यखरखनादानं(खन्याकरवनादानं) स्वस्थाचित्तोपि वर्धयेत् ।
कोशमूलोपि राजेति प्रवादः सार्वलौकिकः ॥ १०३ ॥

एतत्सर्वं जहातीह कोशे व्यसनवान्नृपः ।
क्षीणं वणं(लं) वर्धयति स्वतो गृह्णाति च प्रजाः ॥ १०४ ॥

कोशवान्पृथिवीपालः परैरप्युपजीव्यते ।

कोशो द्रव्यमित्यर्थः । कोशः संरक्ष्य इत्युक्तं रक्षणं चाधिकारिसापेक्षमिति कोशाधिकारिलक्षणमाह--

लोहवस्त्राजिनादीनां रत्नानामभिधानवित् ॥ १०५ ॥

विज्ञाता फल्गुसाराणां अनाहार्यः शुचिस्मितः ।
निपुणश्चाप्रवृत्तश्च धनाध्यक्षः प्रकीर्तितः ॥ १०६ ॥

इति कोशनिरूपणम् । अथ देशः--

यो राष्ट्रमनुगृह्णाति परिगृह्य स्वयं नृपः ।
संजातमुपजीवन्स लभते सुमहत्फलम् ॥ १०७ ॥

पौराञ्जानपदान्सर्वान्संश्रितोपाश्रितांस्तथा ।
यथाशक्त्यानुकम्पेत सर्वानप्यधनानपि ॥ १०८ ॥

धर्माधर्मौ विजानन्हि सतां मार्गमनुस्मरन् ।
प्रजा रक्षेन्नृपः साधु हन्याच्च परिपन्थिनः १०९ ॥

राष्ट्रोपघातं कुर्वीरन्ये पापा राजवल्लभाः ।
एकैकशः संहतांस्तान्दूष्यान्वा परिचक्षते ।
दूष्यानुपांशुदण्डेन हन्याद्राजाविलम्बितम् ॥ ११० ॥

इति राष्ट्रम् । दुर्गस्वरूपनिरूपणम् । तत्र सामान्यतो दुर्गप्र(शं)सामाह मनुः--

एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं समाश्रयेत् ॥ १११ ॥

सरीसृपविहीनं च व्यालतस्करसंयुतम् ।
एवंविधं यथालाभं राजा विषयमाविशेत् ॥ ११२ ॥

तत्र दुर्गं नृपः कुर्यात् षष्ट(ण्णा ?)मेकतमं बुधः ॥ ११३ ॥

षड्भेदानेवाह—

धन्विदुर्गं महीदुर्गं नरदुर्गं तथैव च ।
वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं तथैव च ॥ ११४ ॥

षण्णां मध्ये गिरिदुर्गं विशेषमाह—

सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ।
दुर्गं च परिखोपेतं वप्राट्टालकसंयुतम् ॥ ११५ ॥

शतघ्नीयन्त्रमुख्ये(श्च) शतशस्तु समावृतम् ।
गोपुरं सकपाटं च तत्र स्यात्सुमनोहरम् ।
सपताको गजारूढो येन राजा विशोत्सवं(शेत्स्वयम ?) ॥ ११६ ॥

तस्य मध्ये तु पर्याप्तं कारयेद्गृहमात्मनः ।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमन्वितम् ॥ ११७ ॥

तदुक्तं मात्स्ये—

इत्येवमेतैः सकलैरुपेतैर्द्रव्यैः पराध्यैः परिरक्षितः स्यात् ।
राजा वसेत्तत्र गृहे सुशुभ्रे गुणान्विते लक्षणसंप्रयुक्ते ॥ ११८ ॥

तत्र दुर्गे इत्यर्थः । अथ दुर्गेषु स्थलविभागमाह—

चतस्रश्च तथा तत्र कार्यास्त्वायतवीथयः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम् ॥ ११९

वीथ्यग्रे च द्वितीये तु राजवेश्म विधीयते ।
धर्माधिकरणं कार्यं वीथ्यग्रे च तृतियके ॥ १२० ॥

चतुर्थे चैव वीथ्यग्रे गोपुरं तु विधीयते ।
आयतं चतुरस्रं वा वृत्तं वा कारयेत्पुरम् ॥ १२१ ॥

अन्तहीनं त्रिकोणं च यवमध्यं तथैव च ।
अर्धचन्द्रप्रकारं च वज्राकारं च कारयेत् ॥ १२२ ॥

अर्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसेत् ।
अन्यत्र तु न कुर्वीत प्रयत्नेन विजानता ॥ १२३ ॥

राज्ञा कोशगृहं कार्यं दक्षिणे राजवेश्मतः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥१२४ ॥

गजानां प्राङ्मुखी शाला कर्तव्या वाप्युदङ्मुखी ॥ १२५॥

आग्नेये च तथा भागे आयुधागारमिष्यते ।
महानसं च धर्मज्ञकर्मशाला तथापरा ॥ १२६ ॥

गृहं पुरोधसः कार्यं वामतो राजवेश्मनः ।
मन्त्रिदैवविदां चैव चिकित्साकर्तुरेव च ॥ १२७ ॥

तत्रैव च महाभाग गृहाणि च विधारयेत् ।
गवां स्थानं तथैवात्र तुरगाणां तथैव च ॥ १२८ ॥

उत्तराभिमुखा श्रेणि तुरगाणां विधीयते ।
दक्षिणाभिमुखा चाथ परिशेषास्तु गर्हिताः ॥ १२९ ॥

तुरङ्गशालाया विशेषमाह--

तुरङ्गास्ते तथा कार्याः प्रदीपः सर्वरात्रिकः ।
कुक्कुटान्वानरांश्चैव मर्कटांश्च नराधिप ॥ १३० ॥

गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमः ।
अस्तंगते न कर्तव्यो देवदेवे दिवाकरे ॥ १३१ ॥

दुर्गे तत्र यथास्थानं राजा विज्ञाय सारथीन् ।
दद्यादावसथस्थानं सर्वेषामनुपूर्वशः ॥ १३२ ॥

योधानां शिल्पिनां चैव सर्वेषामविशेषतः ।
दद्यादावसथान्दुर्गे मन्त्रकालाविदान्(दः) शुभान् ॥ १३३ ॥

गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ।
आहरेत बलं राजा दुर्गे परबला रुज. ॥ १३४ ॥

कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ।
बहूनां च न वै दुर्गं विना कार्यं ततो भवेत् ॥ १३५ ॥

स्थलविभागमुक्त्वा दुर्गसंपत्तिमाह--

दुर्गे तु यन्त्राः कर्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राजंस्तैस्तु रक्षा विधीयते ॥ १३६ ॥

दुर्गद्वाराणि गुप्तानि कार्याण्यपि च भूभृता ।
संग्रहश्चात्र सर्वेषामायुधानां च शस्यते ॥ १३७ ॥

धनुषां क्षेपणीद्या(या)नामायुधानां च शस्यते ।
शराणामथ खड्गानां कवचानां तथैव च ॥ १३८ ॥

कणपानां त्रिशूलानां पट्टिशानां तथैव च ।
प्रासानां चैव शस्त्राणां शक्तीनां च तथैव च ॥ १३९ ॥

परश्वधानां चक्राणां चमणां वर्मभिः सह ।
कुठाररुजु(रज्जु ?) वेत्राणां पट्टिकानां तथैव च ॥ १४० ॥

हेतुकानां च देवानां मङ्गलानां च संशयः ।
सर्वेषां शिल्पिभाण्डानां संचयस्तत्र चेष्यते ॥ १४१ ॥

वादित्राणां च सर्वेषामोषधीनां तथैव च ।
यवसानां प्रभूतानां इन्धनानां तथैव च ॥ १४२ ॥

गुडस्य सर्वतलानां गोरसानां तथैव च ।
वसानामथ मज्जानां स्नायूनामस्थिभिः सह ॥ १४३ ॥

गोचर्मपटहानां च धान्यानां सर्वतस्तथा ।
तथैवाभ्रपठानां (?) च यवगोधूमयोरपि ॥ १४४ ॥

सणसर्जरसं भूर्जं जतुलाक्षा च टङ्कणम् ।
राजा संचिनुयाद्दुर्गे यच्चान्यदपि किंचन ॥ १४५ ॥

रत्नानां सर्वलोहानां वस्त्राणां चाप्यशेषतः ।
कोद्रवमुद्गमाषाणां चणकानां तिलैः सह ॥ १४६ ॥

तथा च सर्वसस्यानां पांसुगोमययोरपि ।
कुम्भाश्चाशीर्वि(ष)र्युक्ताव्यालसिंहादयस्तथा ॥ १४७ ॥

भृङ्गाश्च पक्षिणश्चैव रक्ष्यास्ते च परस्परम् ।
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ॥ १४८ ॥

कर्तव्यानि महाभाग यत्नेन पृथिवीभुजा ।
उक्तानि चाप्यनुक्तानि राजा द्रव्याण्यनेकशः ॥ १४९ ॥

सुगुप्तानि पुरे कुर्याज्जनानां हितकाम्यया ।
उक्तानि चाप्यनुक्तानि ॥ १५० ॥

विषाणां वारकं कार्यं प्रयत्नेन महीभुजा ।
विचित्राः श्वापदा कार्या विषस्य शमनास्तथा ॥ १५१ ॥

रक्षोभूतपिशाचानां परघ्नाः पुष्टिवर्धनाः ।
कलाविदग्धपुरुषा दुर्गे धार्याः प्रयत्नतः ॥ १५२ ॥

भीतान्क्रुद्धान्प्रमत्तांश्च तथैव च विमानितान् ।
कुभृत्यान्पापशीलांश्च न राजा वासयेत्पुरे ॥ १५३ ॥

ओषधानि च सर्वाणीत्युक्तं तानि मत्स्यपुराणोक्तानि ज्ञेयानि—

यन्त्रायुधाट्टालचयोपपन्न समग्रधान्योषधिसंप्रयुक्तम् ।
वणिग्जनैश्चावृतमावसेत दुर्गं सुगुप्तं नृपतिः सदैव ॥ १५४ ॥

इति दुर्गनिरूपणम् । दुर्गप्रसङ्गाद्दुर्गाध्यक्षलक्षणमाह—

अनाहार्यश्च शूरश्च वाग्मी प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राज्ञ उद्युक्तः सर्वकर्मसु ॥ १५५ ॥

गजानां प्राङ्मुखी शालेत्युक्तं तदर्थं गजभेदास्तत्प्रशंसामाह—

यतो गजैर्विना राज्ञां राजशोभा न जायते ।
जयप्रतापसैन्यस्य रक्षा तस्मादिहोच्यते ॥ १५६ ॥

पुरा स्वर्गे सुखेनासन् कामगाः खेचरा गजाः ।
मुनिशापाद्गता भूमौ ततो जाता वनेचराः ॥ १५७ ॥

गजभेदानाह—

भद्री मन्द्रो मृगो मिश्रश्चतुर्धा जायते गजः ।
जायते युगत्रयेभूवन्मिश्राः कलियुगे गजाः ॥ १५८ ॥

यतः सत्यं ततो धर्मो यतो धर्मस्ततो धनम् ।
यतो रूपं ततः शीलं यतो नागास्ततो जयः ॥ १५९ ॥

यद्वद्वदन(वनम)सिंहं च यद्वद्राष्ट्रमपार्थिवम् ।
यद्वच्छौर्यमशस्त्रं च तद्वत्सैन्यमकुञ्जरम् ॥ १६० ॥

प्राकारगोपुराट्टालकपाटोद्घाटनादिषु ।
भञ्जने मर्दने चैव नागा वज्रोपमाः स्मृताः ॥ १६१ ॥

शरजालाञ्चितमुखः कोन्यः शक्तः परं गजात् ।
हन्तुं प्राकारमुन्मथ्यं रथाश्वनरकुञ्जरान् ॥ १६२ ॥

एकशक्तिप्रहारेण म्रियतेश्वो नरोपि च ।
सहेन्महाप्रहाराणां शतं युद्धेषु वारणः ॥ १६३ ॥

चीत्कारैर्नाशयन्तः स्वपतिभटमनो मोदयन्तो मदाढ्याः
संग्रामसीम्नि खिलबहलतां बाढमाढौकमानाः ।
शुण्डादण्डप्रहारैः परमपि च बलं कम्पयन्तः परेषां
येषां सर्वे गजेन्द्रा भुवि विजयविधौ ते मता भूमिपालाः ॥ १६४ ॥

चलन्ति येषां न शतं गजेन्द्राः पुरःप्रयाणे चलशैलतुल्याः ।
वाञ्छन्ति चैवं विजयं कथं ते राजेति शब्दं च कथं भजन्ते ॥१६५॥

तावद्गर्जन्ति वीर्यात्परानिधनविधौ युद्धमध्येपि वीरा-
स्तावद्धावन्ति वेगं परमपि दधतः संमुखीनास्तुरङ्गाः ।
शूरारूढः सुसज्जो मदमुदितमान(मनो ?) मानमानं विधुन्वन्
यावन्नायाति कोपात्कृतविविधरवाटोप एकोपि नागः ॥ १६६ ॥

मातङ्गैरपि यैर्महेन्द्रभवनं पुण्याधिकं जन्यते
यैः श्यामैरपि सर्वलोकमहिता कीर्तिः समातन्यते ।
यैर्मत्तैरपि सङ्गरे रिपुमदः शोषं समानीयते
तेमी भाग्यबतः प्रयान्ति पुरतः स्तम्बेरमा भूपतेः ॥ १६७ ॥

इति प्रशंसा । भद्रादिलक्षणानि—

प्रतिमानेषु विपुलश्चारुपृष्ठायताननः ।
मुखे सुरभिनिश्वासस्ताम्राजिह्वोष्टतामुकः ॥ १६८ ॥

तथास्य तुल्यसंस्थानौ दन्तौ शुभ्रौ विशेषतः ।
मधुपिङ्गलनेत्रश्च महाकायो महाबलः ॥ १६९ ॥

पुरस्तादुच्छ्रितश्चापि पश्चादवनतोपि यः ।
धनुर्विनतविंशश्च(?)समपादतलः शुभः ॥ १७० ॥

विंशत्या च नखैर्युक्ता अष्टादशभिरेव वा ।
विद्युद्दावाग्निसिंहेभ्यो न विभेत्यंशुके(कुशा)दपि ॥ १७१ ॥

अन्वर्थवेदी शू(र)श्च क्षमावान्नच कर्कशः ।
कल्याणमेधास्तेजस्वी भद्रः स परिकीर्तितः ॥ १७२ ॥

अथ मन्दः—

महाग्रीवो महावक्त्रो महाप्रोथो महोदरः ।
पि(पी)नोरुवंशः सान्द्रत्वक्सुविभक्तो महासुरः ॥ १७३ ॥

बहलैर्बहुभिर्दीर्घैर्युक्तः स्निग्धतनूरुहैः ।
स्थिरैः स्थिराकृतितलैः पादैश्च पृथुभिः समैः ॥ १७४ ॥

स्थिरास्निग्धे विशाले च पीने चापि प्रकीर्तिते ।
विषाणे तस्य विद्वद्भिरोष्ठौ दीर्घश्च रोमशः ॥ १७५ ॥

कूर्मसंस्थानगमनो मन्दो मन्दगतिक्रमः ।
संमील्य लोचने नित्यं निद्रान्ध इव गच्छति ॥ १७६ ॥

मृगः—

तनुत्वक्कर्णपादो यः स्तब्धास्यस्तनुमेहनः ।
तनुवंशोदरश्चैव तनुव्यक्ततनूरुहः ॥ १७७ ॥

दीर्घजिह्वविषाणश्च दीर्घगात्रस्तथा च सः ।
प्रध्वस्तरोमकर्णश्च पुरस्ताच्चापि संवृतः ॥ १७८ ॥

निपाते गोचरस्थाने याया शय चा(?)निर्वृतः ।
ह्रस्वश्रवणलाङ्गूलो दीर्घं विक्रमते क्रमैः ॥ १७९ ॥

पुनः पुनश्च विनदन् दुर्गतिश्चापि धावति ॥ १८० ॥

अथ मिश्रलक्षणम्—

बह्वाशी बह्वलीकश्च दण्डपातेषु चाक्षमः ।
गच्छेत्प्रकृष्टवेगश्च भारं प्राप्यावसीदति ॥ १८१ ॥

कृच्छ्राच्चाप्यायते नागः क्षिप्रं च परिहीयते ।
बह्वम्ललवणैश्चापि रुक्षैश्चातुरतां व्रजेत् ॥ १८२ ॥

नित्यं च सान्त्वयेदेनं न चैनमभितापयेत् ।
सर्वेषां लक्षणैः कैश्चिद्युक्तो मिश्रो भवेद्गजः ॥ १८३ ॥

शरतोमरवज्रैश्च गजस्कन्धहता नराः ।
क्षणात्स्वर्गं प्रयन्त्येव तस्मात्स्वर्गोपमा गजाः ॥ १८४ ॥

इत्येवं पूर्वोक्तसंपत्तिसहिते दुर्गे गजा सुखं वसेत् । इति साङ्गदुर्गनिरुपणम् । अथ बलि(ल)निरूपणम् । तच्च(च)लं षाड्विधम्—

षाड्विधं तु बलं व्यूह्य द्विषतोभिमुखं व्रजेत् ॥ १८५ ॥

इति षाड्विधं बलम् । तदेवाह—

मौलं भूतं श्रेणि सुहृद् द्विषदाटविकं बलम् ।
पूर्वं पूर्वं गरीयस्तु बलानां विषमं स्मृतम् ॥ १८६ ॥

अस्यार्थः । मौलं परंपरागतम् । भूतं यावद्विभवस्थायि । श्रेणि गमनमार्गे स्थाने निवेशि(तं ?) । सुहृन्मित्रबलम् । द्विषदधीनं जातं यत्तद् द्विषत् । आटविकं अरण्यसंबन्धि । उक्तस्य च तस्य चतुरङ्गत(ता)माह—

हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुर्विधम् ॥ १८७ ॥

इति बलम् । बलस्य सेनापत्यधीनत्वात् सेनापतिलक्षणमाह—

कुलीनः शीलसंपन्नो धनुर्वेदविशारदः ।
हस्ताशिक्षादिकुशलो नित्यं हि श्लक्ष्णभाषितः ॥ १८८ ॥

निमित्ते शकुनज्ञाने वेत्ता चैव चिकित्सके ।
कृतज्ञः कर्मणां शूरस्तथा क्लेशसहो रु(हस्त्वृ)जुः ॥ १८९ ॥

व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषतः ।
राज्ञा सेनापतिः कार्यो ब्राम्हणः क्षत्रियोथवा ॥ १९० ॥

एवं ये कुशलं शूरं हिते स्थितमकल्मषम् ।
सेनापतिं प्रकुर्वन्ति ते जयन्ति रणे रिपून् ॥ १९१ ॥

बृहस्पतिसमं बुध्या क्षमया पृथिवीसमम् ।
समुद्रमिवगाम्भीर्ये हिमवन्तमिवाचलम् ॥ १९२ ॥

प्रजापतिमिवौदार्ये तेजसा भास्करोपमम् ।
महेन्द्रमिव शत्रूणां ध्वंसनं शरवृष्टिभिः ॥ १९३ ॥

इति सेनापतिलक्षणम् ।

हस्तिशिक्षाविधानज्ञो वनजाति(वि)शारदः ।
क्षेळा(क्लेश)क्षमस्तथा राज्ञो गजाध्यक्षः प्रशस्यते ॥ १९४ ॥

एतैरेव गुणैर्युक्तः स्थविरस्य(श्च) विशिष्यते ।
गजारोही नरेन्द्रस्य सर्वकर्मसु शस्यते ॥ १९५ ॥

अश्वाध्यक्षः--

हयशिक्षाविधानज्ञोश्वचिकित्सितपारकः(गः) ।
अश्वाध्यक्षो महीभर्तुः श्वा(स्वा)सनस्य(श्व)विशिष्यते ॥ १९६ ॥

अथ राजभूषणे सप्ताङ्गनिरूपणम् । अथ राजकृत्यानिरूपणम्—

विचिन्त्य कार्याणि निशावसाने विद्वत्सुहृन्मण्डलमिश्रितानाम् ।
बलार्थदेशेषु नियोजितानां समाश्रितानां च कृताकृतानि ॥ १९७ ॥

स वेणुवीणापटहस्वनानां गीतेन पूर्वं व्यपनीतनिद्रः ।
शय्यां त्यजेत्पूर्वनिशावसाने शृण्वन्गिरो मङ्गलपाठकानाम् ॥ १९८ ॥

तदुत्तरमाह्निकोक्तरीत्या शौचदन्तधावनानि कुर्यात् । तदुक्तं मनुना--

प्रातरुत्थाय नृपतिः कुर्याद्दन्तस्य धावनम् ॥ १९९ ॥

शृण्वन्गिर इत्यनेन प्राचोधिकादिपव(ठ)नमप(पि) ज्ञेयम् । ततश्चादर्शदर्शनपूर्वकं श्मश्रु-संस्कारः । अनन्तरं दैवज्ञमुखात्पञ्चाङ्गश्रवणम् ।

श्रुत्वा तिथीभग्रहवासरं च प्राप्नोति धर्मार्थयशांसि सौख्यम् ।
आरोग्यमायुर्विजयं जयं च दुःस्वप्ननाशं च तथा विदध्यात् ॥ २०० ॥

ततश्च—

प्रणम्य देवांश्च गुरूंश्च सर्वान्दत्त्वा च गां वत्सयुतां द्विजाय ।
दृष्ट्वा मुखं सर्पिषि दर्पणे च सर्पिश्च दद्यात्सहिरण्यमेव ॥ २०१ ॥

ततः प(पर)राष्ट्रभेदादिग्रहणार्थं चारान्प्रेषयेत् । तदाह कामदक्कः—

प्रेषयेच्च ततश्चारान् देशेष्वन्येषु सादरम् ॥ २०२ ॥

तेषां लक्षणमाह मात्स्यः (त्स्ये)—

अनाहार्यान्क्लेशसहान् नियुञ्जीत सदा नवान् ।
जनस्याविदितान्सौम्यांस्तथाज्ञातान्परस्परम् ॥ २०३ ॥

कथिताः सततं राजन् राजानश्चारचक्षुषः ।
स्वके देशे परे देशे ज्ञानशीलान्विचक्षणान् ॥ २०४ ॥

वणिजो मन्त्रकुशलान् सांवत्सरचिकित्सकान् ।
तथा प्रव्राजिताकारां(श्चारान्राजा नियोजयेत्) ॥ २०५ ॥

न च(चा)स्य रा(राजा)श्रद्दध्याच्चारस्य प्रियभाषितः(तम्) ।
द्वयोः संबन्धमाज्ञाय श्रद्दध्यान्नृपतिस्ततः ॥ २०६ ॥

परस्परस्याविदितौ यदि स्यातां चरावुभौ ।
तस्माद्राजा प्रयत्नेन गूढांश्चारान्नियोजयेत् ॥ २०७ ॥

तपास्विलिङ्गिनो धूर्ताः पण्याशिल्पोपजीविनः ।
चाराश्चरेयुः परितः पिबन्तो जगतो जनः (नान्) ॥ २०८ ॥

निर्गच्छेयुर्विशेयुश्च सर्ववार्ताविदो ह्यतः ।
चाराः सकाशं नृपतेश्चक्षुर्दूरचरं हि तत् ॥ २०९ ॥

सूक्ष्मसूत्रप्रचारेण गश्येद्विविधचेष्टितम् ।
स्वपन्नपि हि जागर्ति चारचक्षुर्महीपतिः ॥ २१० ॥

कामन्दकोऽपि—

अनेनासंपतोमूढा(तन्मार्गा)त्पतस्यन्ध(न्धः) समेपि हि ।
सर्वसंपत्समुदयं सर्वावस्थाविचेष्टितम् ।
चरेण विद्विषां विद्यादुद्देशप्रार्थनादि वा ॥ २११ ॥

इति । तन्नियोगे च तेषामपि स्वरूपज्ञानं भवति—

विश्रम्भेणापि च प्रेम्णा यदाज्ञापयति प्रभुः ।
तस्य कर्ता स एव स्याद्गुणीभूतस्तु शंकरः ॥ २१२ ॥

कर्तव्यं भृत्यवर्गाय स्वामी चेन्न समादिशेत् ।
अस्तिमास्तीति कस्तर्हि तस्य ज्ञास्यति पौरुषम् ॥ २१३ ॥

ततश्च—

ऋत्विक्पुरोहिताचार्यैराशीर्भिराभिनन्दितः ।
दृष्ट्वा ज्योतिर्विदो वैद्यान् दत्त्वा गां काञ्चनं महीम् ॥ २१४ ॥

सभां प्राविशेदिति । पुरोहितादीनां लक्षणान्याह—

वेदवेदाङ्गतत्वज्ञो जपहोमपरायणः ।
आशीर्वादपरो नित्यं एष राजपुरोहितः ॥ २१५ ॥

अ(थ) धर्माधिकारी—

समः शत्रौ च मित्रेच धर्मशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्माधिकरणी(णे) भवेत् ॥ २१६ ॥

अथ ज्योतिर्वित्—

यत्प्रोक्तं त्रिपुरान्तकेन बहुधा शास्त्रं स्वराणां द्विज-
स्तत्राभ्यासरतो जितेन्द्रियचयः शास्त्राभिभाषी च यः ।
स्पृष्टं कर्म दिवौकसां सुगु(ग?)णिनाज्जानाति निःसंशयम्
तस्यादेशविधायिनि क्षितिपतौ स्थैर्यं जयश्रीर्भवेत् ॥ २१७ ॥

व्यक्ताङ्कः फलकालवित् सुकृतवान्पूर्वापरस्माकरः(रकः)
पाटीकुट्टकबीजशास्त्रचतुरः सिद्धान्तवित्प्राञ्जलिः ।
वर्णावर्णसवर्णनैकगु(ग)णने भूयो महानुद्यमी
सम्यग्जातकसिद्ध एव गणकः श्लाघ्यो विदां नापरः ॥ २१८ ॥

भिषक्—

पारम्पर्यागतो यः स्यादष्टाङ्गेषु चिकित्सिते ।
अनाहार्यः स वैद्यः स्यात् धर्मात्मा च कुलोद्गतः ॥ २१९ ॥

प्राणाचार्यः स विज्ञेयो वच(स्तस्य च भू)भुजा ।
राजन्राज्ञा सदा कार्यं यथा कार्यं पृथग्जनैः ॥ २२० ॥

सभाप्रवेशः—

स्मितप्रसन्नः प्रथमाभिभाषितैः प्रसाददृष्ट्वा(ष्ट्या) करसंग्रहैश्च ।
यथानुकूलं हृदयान्यपि द्विषां प्रसादयन्धर्मसभां प्रवेशयेत् ॥ २२१ ॥

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत् ।
विसृज्य च प्रजाः सर्वा मन्त्रयेत्सह मन्त्रिभिः ॥ २२२ ॥

खड्गधारिणो निकटवर्तित्वात्तल्लक्षणमाह—

सुरूपस्तरुणः प्रांशुर्दृढभक्तः कुलोद्भवः ।
शूरश्चैव सहश्चैव खड्गधारी प्रकीर्तितः ॥ २२३ ॥

अथ रक्षिणः—

प्रांशवो व्यायताः शूरा दृढभक्ता निराकुलाः ।
राज्ञा तु रक्षिणः कार्याः सदा क्लेशसहा हिताः ॥ २२४ ॥

ताम्बूलधारी—

अनाहार्योऽनृशंसस्य(श्च) दृढभक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥ २२५ ॥

अत्रैव प्रसङ्गात्सकलसाधारणं सेवकलक्षणमुच्यते —

ताडितोपि दुरुक्तोपि दण्डितोपि महीभुजा ।
न चिन्तयति यः पापं स भृत्योर्हो महीभुजाम् ॥ २२६ ॥

भर्तुरधासनं रथैर्मुहुर्नान्यत्र तिष्ठति (निक्षिपेत्) ।
(ब्रूयान्न किंचिदन्योन्यं तिष्ठेच्चास्यं विलोकयन्) ॥ २२७ ॥

कोन्तेत्यङ्गमिति ब्रूयात्सम्यगाज्ञापयेति वा ।
आज्ञां चावितथां कुर्याद्यथाशक्त्यविलम्बितम् ॥ २२८ ॥

तेषां वृत्तमाह—

उच्चैः प्रहसनं कासं ष्ठीवनं कुत्सनं तथा ।
जृम्भणं गात्रभङ्गं च परी(र्व)स्फोटं च वर्जयेत् ॥ २२९ ॥

प्रविश्य सानुरागस्य चित्तज्ञः स्याच्च संमतः ।
समर्थयश्च सत्पक्षं साधु भाषेत भाषिते ॥ २३० ॥

नान्नियोगेन वा ब्रूयादर्थं सुपरिनिश्चितम् ।
सुखप्रबन्धगोष्ठीषु विवादे वादिनां मतः ॥ २३१ ॥

विजानन्नपि न ब्रूयाद् भर्तुः क्षिप्तोत्तरं वचः ।
प्रवीणोपि च मेधावी वर्जयेदभिमानिताम् ॥ २३२ ॥

यदप्युच्चैर्विजानीयान्नीचैस्तदपि कीर्तयेत् ।
कर्मणां तस्य वैशिष्ट्यं कथयेद्विनयान्वितः ॥ २३३ ॥

आपद्युन्मार्गगमने कार्यकालात्ययेषु च ।
अपृष्टोपि हिना(ता)न्वेषी ब्रूयात्कल्याणभाषितम् ॥ २३४ ॥

ये शूरा ये च विद्वांसो ये च सेवाविपश्चितः ।
ये(ते)षामेव विकाशिन्यो भोग्या नृपतिसंपदः ॥ २३५ ॥

अनुकूलं प्रियं तस्य वक्तव्य जनसंसदि ।
रहोगतस्य वक्तव्यमाप्रियं यदृतं भवेत् ॥ २३६ ॥

अन्तःपुरधनाध्यक्षैर्वैरिदूतैः पराकृतैः ।
संसर्गं न व्रजेत्प्राज्ञो विना पार्थिवशासनात् ॥ २३७ ॥

दुष्कृत्यं हि नरेन्द्रस्य न च संकीर्तयेत्क्वचित् ।
वस्त्रमस्त्रमलंकारं राज्ञा ध(द)त्तं च धारयेत् ॥ २३८ ॥

शाब्दलोल्यं च पैशून्यं नास्तिक्यं क्षुद्रता तथा ।
चापल्यं च परित्याज्यं नित्यं राज्ञोनुजीविभिः ॥ २३९ ॥

इति सर्वसाधारणसेवकवृत्तिः । अथ सभासदाः—

धर्मशास्त्रार्थकुशलाः कुलीनाः सत्यवादिनः ।
समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदाः ॥ २४० ॥

तस्मात्सभ्यः सभां गत्वा रागद्वेषविवर्जितः ।
वचस्तथाविधं ब्रूयादन्यथा नरकं व्रजेत् ॥ २४१ ॥

नीतिशास्त्रस्य स्पष्टार्थत्वात्तत्कर्मभिनिवेशः कार्यः—

मेधावी वाक्पटुर्धीमांल्लघुहस्तो जितेन्द्रियः ।
शास्त्रशास्त्रपरिज्ञाता एष लेखक उच्यते ॥ २४२ ॥

मन्त्रयेत्सहमन्त्रिभिरित्युक्तं तदेवाह—

गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः ।
अरण्ये नि(निः)शलाके वा मन्त्रयेन्नाभिभाषितः ॥ २४३ ॥

मध्यंदिनेर्धरात्रे वा विश्रान्तो विगतक्लमः ।
चिन्तयेद्धर्मकामार्थान् साध्यं तैरेक एव वा ॥ २४४ ॥

कन्यानां संप्रदानं च कुमाराणां च रक्षणम् ।
दूतसंप्रेषणं चैव कार्यशेषं तथैव च ॥ २४५ ॥

अन्तःपुरप्रचारं च प्रणीधीनां च चेष्टितम् ।
कृत्स्नं चाष्टविधं कर्म पञ्चवर्गं च तत्त्वतः ॥ २४६ ॥

अनुरागापरागौ च प्रचारं मण्डलस्य च ।
उपेतारमुपेयं च सर्वोपायांश्च कृत्स्नशः ॥ २४७ ॥

एतत्त्रयं समाश्रित्य प्रयतेतात्मसिद्धये ।
एवं सर्वमिदं राजा सह संमन्त्र्य मन्त्रिभिः ॥ २४८ ॥

चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पण्डितस्तानि(न्नि)बन्धयात् ।
अल्पप्रज्ञैः सह मन्त्रं न कुर्यान्न दीर्घसूत्रैरलसैश्चारणैश्च ॥ २४९ ॥

इति । भारतेपि—

धर्मः प्रागेव चिन्त्यः सविवगतिमति(?) सर्वदा चिन्तनीयं
ज्ञेयं लोकानुवृत्तं वरवसूचने(?)मण्डलं वीक्षणीयम् ।
प्रच्छायौ रागरोषौ मृदुकठिणरसौ योजनीयौ स्वकाले
आत्मा यत्नेन रक्ष्यो रणभुवि च परं सोपि नापेक्षणीयः ॥ २५० ॥

उक्तं च—

केन वृत्तेन वृतज्ञो वर्तमानो महीपतिः ।
सुखेनाक्षो(?)न्सुखोदर्कानिह च प्रेत्य चाप्नुयात् ॥ २५१ ॥

चेरध(द्ध)र्मानकटुको युञ्जन्स्नेहं न नास्तिकः ।
आनृशंसश्चेरदर्थं चेरत्कालमनुद्धतः ॥ २५२ ॥

प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी स्यात्प्रगल्भः स्यादनिष्ठुरः ॥ २५३ ॥

संदधीत न नाचार्यं विगृह्णीयान्न बन्धुभिः ।
नाभक्तं जनयेच्चारं कुर्यात्कार्यमपीडनम् ॥ २५४ ॥

अर्थं न वा सत्सु वदेदृणान्ब्रूयान्न चात्मनः ।
आदद्यान्न च साधुभ्यो नासत्पुरुषमाश्रयेत् ॥ २५५ ॥

नापरीक्ष्य नयेद्दण्डं न च मन्त्रं प्रकाशयेत् ।
विसृजेन्न स लुब्धेभ्यो विश्वसेन्नापकारिषु ॥ २५६ ॥

अनीषु गुप्तदारः स्याद्द्रोद्रः स्यादघृणी नृपः ।
स्त्रियः सेवेत नात्यर्थमिष्टं भुञ्जीत नाहितम् ॥ २५७ ॥

अस्तब्धः पूजयेदन्यान्गुरून्सेवेदमायया ।
अर्चेद्देवानदम्भेन श्रियामिच्छेदकुत्सिताम् ॥ २५८ ॥

सेवेदप्रणयं हित्वा दक्षः स्यात्तत्त्वकालवित् ।
सान्त्वयेन्न च मोघाय अनुगृह्णन्न च क्षपेत् ॥ २५९ ॥

प्रहरेन्नच विद्वत्सु न दहेन्न च शोषयेत् ॥ २६० ॥

तथा च कामन्दकः—

निस्तम्भे निर्गवाक्षेच निर्भेदान्तरसंश्रये ।
प्रासादोपर्यरण्ये च मन्त्रयेताविभावितः ॥ २६१ ॥

नावर्तयेन्नहु(प्रभु ?)र्मन्त्रं संरक्षेत्परितस्तु सन् ।
अरक्ष्यमाणं मन्त्रं हि भिनत्त्यात्मपरंपरा ॥ २६२ ॥

मदः प्रमादः कामस्तु सुप्तिः प्रलपितानि च ।
हन्ति मन्त्रं प्रविच्छि(च्छ)न्नाः कामिन्योवानिता(वमता)स्तथा ॥२६३॥

द्वादशेति मनुः प्राह षोडशेति बृहस्पतिः ।
उशना विंशातिरिति मान्त्रिणां मन्त्रमण्डलम् ॥ २६४ ॥

यथा समूह(संभव)मित्यन्ये तत्प्रविश्य यथाविधि ।
मन्त्रयेताहितमनाः कार्यसिद्धिवि(वृ)द्धये ॥ २६५ ॥

अकप्यनेन(?) कार्याणि संप्रधार्य पुनः पुनः ।
प्रावि(दि)शेत्स्वहितान्वेषी मतमेषां पृथक्पृथक् ॥ २६६ ॥

महापक्षो यथाशास्त्रं दृष्टकर्मा हितः सुधीः ।
यद्यद्यायान्मतारुढस्तत्तत्साधु समाचरेत् ॥ २६७ ॥

नातीयात् कार्य(कालं) हि कृत्वा मन्त्राविनिश्चयम् ।
अतिक्रान्तं तु तं भूयो यथायोगं प्रकल्पयेत् ॥ २६८ ॥

न कार्यकालं मतिमानातिक्रामेत कर्हिचित् ।
(कथं)चिदेव भवति कार्ये योगः सुदुर्लभः । २६९ ॥

सतां मार्गेण मतिमान् काले कर्म समाचरेत् ।
काले समाचरन् साधुरसव(कृ)त्फलमश्नुते ॥ २७० ॥

इति मन्त्रबलान्महीपतिर्महतो दुष्टभुजङ्गमानिव ।
विनयेन्नयमार्गमास्थितो वशमुद्योगसमन्वितो रिपून् ॥ २७१ ॥

ततश्च—

कृतमन्त्रास्तु मन्त्रज्ञो मन्त्रिणां मन्त्रसंमतम् ।
यातव्याय प्राहिणुयाद्दूतं दूत्याभिमानिनम् ॥ २७२ ॥

प्रगल्भः स्मृतिमान् वाग्मी शस्त्रे शास्त्रे च निष्ठितः ।
अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति ॥ २७३ ॥

स दूतः शासनाद्गच्छेद्गन्तव्यमुत्तरोत्तरम् ।
स्वराष्ट्रपरराष्ट्राणामिति चेति च चिन्तयन् ॥ २७४ ॥

नाविज्ञातः प(पु)रं शत्रोः प्रविशेच्च न संसदि ।
कालमीक्षेत कार्यार्थ अनुज्ञातस्य(श्च) निष्पतेत् ॥ २७५ ॥

सारवत्तां च राष्ट्रं यद्दुष्कृतिं गुप्तमेव च ।
छिद्रं शत्रोर्विजानीयात्कोशामित्रबलानि च ॥ २७६ ॥

दूतकारणमाह कामन्दकः—

पृच्छ्यमानोपि न ब्रूयात्स्वस्वामिप्रकृतिच्युतम् ।
ब्रूयात्प्रसृतया वाचा सर्वं वेद भवानिति ॥ २७७ ॥

कुलेन नाम्ना स्तोत्रेण कर्मणा च महीयसा ।
कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि ॥ २७८ ॥

तपस्वी व्यसनोपेतः स्वचरैः सह संवसेत् ॥ २७९ ॥

दूतकर्माह कामन्दकः—

तिष्टन्वार्ताविशेषान्वै भर्तुः सर्वा निवेदयेत् ।
रिपोः शत्रुपरिच्छेदसुहृद्बन्धुविभेदनम् ॥ २८० ॥

दुर्गकोशबलज्ञानं ह्यपक्षोपसंग्रहः ।
राज्यान्तरगतानां च आत्मसंस्कारणं तथा ॥ २८१ ॥

युद्धाय सारभूज्ञानं दूतकर्मेति कथ्यते ।
दूतेनैव वरेक(नरेन्द्र)स्तु कुर्वीतारिविकर्षणम् ।
सपक्षे च विजानीयात्परदूतविचेष्टितम् ॥ २८२ ॥

इति दूतकर्म । दूतान्संप्रेष्य किं कुर्यादित्याह—

विश्रम्भी नित्ययुक्तोपि निगूढाकारचेष्टितः ।
प्रियाण्येवाभिभाषेत यत्कार्यं कार्यमेव तत् ॥ २८३ ॥

यदा मन्येत मतिमान् हृष्टं पुष्टं स्वकं बलम् ।
परस्य विपरीतं च तदा विग्रहमाचरेत् ॥ २८४ ॥

भूभिर्मित्रं हिरण्यं च विग्रहस्य फलत्रयम् ।
यदैतन्नियतं भावि तदा विग्रहमाचरेत् ॥ २८५ ॥

आगतं विग्रहं विद्वानुपायैः प्रशमं नयेत् ।
विजयस्य ह्यनित्यत्वाद्रभसेन न संपतेत् ॥ २८६ ॥

समाक्रान्तो बलवता कांक्षन्नभ्रंशिनीं श्रियम् ।
आश्रयेद्वैतसीं वृत्तिं न भौजङ्गीं कथंचन ॥ २८७ ॥

क्रमाद्वैतसवृत्तिश्च सा(प्रा)प्नोति विपुलां श्रियम् ।
भुजङ्गवृत्तिराप्नोति वधमेव तु केवलम् ॥ २८८ ॥

काले प्राप्ते तु मतिमानुत्तिष्ठेत्क्रूरसर्पवत् ॥ २८९ ॥

प्रसादवृत्त्या हितलोकवृत्तया प्रविश्य शत्रोर्हृदयं निरन्तरम् ।
नयाग्रहस्तेन हि काललुच्छिते प्रसह्य कुर्वीत कचग्रहां श्रियम्॥२९०॥

कुलोद्गतं सत्यमुदारविक्रमं स्थिरं कृतज्ञं धृतिमन्तमूर्जितम् ।
अतीव दातारमुपेतवत्सलं सुदुःप्रसादं(धं) प्रवदन्ति विद्विषम्॥ २९१ ॥

असत्यता निष्ठुरताकृतज्ञता भयं प्रमादोलसता विषादिता ।
वृथाभिमानो ह्यतिदीर्घसूत्रता तथाङ्गनाक्षादि विनाशनं
स्त्रि(श्रि) यः ॥ २९२ ॥

इति स्म दोषान्वितमाशु विद्विषं त्रिशक्तियुक्तो विजिगीषया व्रजेत्
अतोन्यथा साधुजनस्य संमतः करोति विद्वानुपघातमात्मनः ॥२९३॥

समन्वितो राज्यपदोन्निनीषया चारेक्षणैर्वीक्षितमण्डलाक्ष(श)यः ।
इमं नृपो विग्रहमार्गमास्थितः स्थितोद्यमः संप्रयतेत सिद्धये ॥२९४॥

इति कामन्दकात् । विग्रहकालो विग्रहप्रसङ्गः (?) ।

धीमानुत्साहसंपन्नः प्रभुशक्त्या समन्वितः ।
श्रियः स्यात्परमं पात्रमपामिव महार्णवः ॥ २९५ ॥

नलिनीवाम्बुसंपत्त्या बुध्या श्रीः परिपाल्यते ।
उत्साहव्यवसायाभ्यां विस्तारमुपनीयते ॥ २९६ ॥

लक्ष्मीरुत्साहसंपन्नाब्दुद्धिशुद्धं प्रसर्पतः ।
नार्पति कायाच्छायेव विस्तारं सोपगच्छति ॥ २९७ ॥

वीतव्यसनमग्रस्तं(श्रान्तं) महोत्साहं महामतिम् ।
प्राविशन्ति सदा लक्ष्म्यः सरित्पतिमिवापगाः ॥ २९८ ॥

सत्वबुध्युपपन्नोपि व्यसनग्रस्तमानसः ।
स्त्रीभिः षण्ढ इव श्रीभिरलसः परिभूयते ॥ २९९ ॥

उत्थानेनैधयेत्सत्वामिन्धनेनेव पावकम् ।
श्रेयो हि सततोत्थायी दुर्बलोपि समश्नुते ॥ ३०० ॥

व्यवसायं सदैवान्यैर्न हि क्लीबवदाचरेत् ।
वसेच्छ्रियं सदोत्थायी सैंहीं वृत्तिं सदा प्रभुः ॥ ३०१ ॥

प्रयत्नप्रेर्यमाणेन महता चित्तहस्तिना ।
रूढवैरिद्रुमोत्खातमकृत्वेह कुतः सुखम् ॥ ३०२ ॥

हेलाकृष्ण(ष्ट)तडित्कान्तिखड्गांशुपरिपिञ्जरैः ।
श्रीमत्करिकराकारैराह्रियन्ते भुजैः श्रियः ॥ ३०३ ॥

उच्चैरुच्चैस्तरामिच्छन्पदान्यायच्छते महान् ।
नीचा नीचैस्तरां यान्ति निपातभयशङ्कया ॥ ३०४ ॥

प्रमाणाभ्यधिकस्यापि महः समधितिष्ठतः ।
पदं तु धत्ते शिरसि केसरी मत्तदन्तिनः ।
गतभीर्भीतिजननं वपुर्भोगीव दर्शयेत् ॥ ३०५ ॥

अथ स्वामिविषये पूर्वोक्तामात्यादिकर्माण्याह—

स्वाम्यादिमित्रपर्यन्तं प्राकृतं मण्डलं हि यत् ।
तत्र कर्म प्रवक्ष्यामि व्यसनं च यथाक्रमम् ॥ ३०६ ॥

तत्र अमात्यकर्माण्याह—

आयव्ययौ दण्डनीतिरमात्यप्रतिषेधनम् ।
व्यसनस्य प्रतीकारो राज्ञि राज्याभिषेचनम्(रक्षणम्) ॥ ३०७ ॥

इत्यमात्यस्य कर्मेदं हन्ति तद्व्यसनान्वितः ।
अमात्यैर्व्यसनोपेतैर्ह्रियमाणो महीपतिः ।
अशक्त एवोत्पतितुं च्छिन्नपक्ष इवाण्डजः ॥ ३०८ ॥

अमात्यकर्माण्याह—

हिरण्यं धान्यवस्त्राणि वाहनानि तथैव च ।
तथान्ये द्रव्यनिचयाः (प्रजातः संभवन्ति हि) ॥ ३०९ ॥

स्थैर्यं परोपजापश्च दुर्गसंस्कार एव च ।
सेतुबन्धो वणिक्कर्म प्रजामित्रपरिग्रहः ।
धर्मकामार्थसिद्धिश्च कोशादेतत्प्रवर्तते ॥ ३१० ॥

अन्वीक्षणं च विद्यानां स्ववर्णाश्रमरक्षणम् ।
ग्रहणं शास्त्रशस्त्राणां युद्धमार्गेपि शिक्षणम् ॥ ३११ ॥

व्यायामः शास्त्रविज्ञानं कर्मणां लक्षणानि च ।
गजाश्वरथपृष्ठेषु यथावत्संप्रवर्तनम् ॥ ३१२ ॥

नियुद्धकोशलं माया पराचित्तप्रवेदनम् ।
धूर्तताऽसाधुयुक्तेषु सदसद्वृत्तदर्शनम् ॥ ३१३ ॥

मन्त्रोद्योगोनुमन्त्रित्वं तद्रक्षा स्वास्थ्यमेव च
उपेक्षा सामदानं च भेदो दण्डश्च साधनम् ॥ ३१४ ॥

प्रशस्ताध्यक्षसेनानीमन्त्यमान्यपुरोधसाम् ।
सम्यक्प्रचारविज्ञानं दुष्टानां चावरोधनम् ।
गतागतपरिज्ञानं दूतसंप्रेषणानि च ॥ ३१५ ॥

धर्मासने प्रतिष्ठानं राज्यकण्टकशोधनम् ।
अकार्यप्रतिषेधश्च कार्याणां च प्रवर्तनम् ॥ ३१६ ॥

अदण्ड्यतामदण्ड्यानां दण्ड्यानां चापि दण्डनम् ।
उपकार्योपकारित्वमिति वृत्तं महीपतेः ॥ ३१७ ॥

एतत्सर्वममात्यादि राजामात्यपुरःसरः ।
नयत्युन्नतिमुद्युक्तो व्यसनी क्षयमेव तु ॥ ३१८ ॥

तस्मिन्धर्मार्थयोर्व्यग्र(ग्रे) तथा चास्वस्थचेतसि ।
सर्वमेतदशेषेण मन्त्री संधातुमर्हति ॥ ३१९ ॥

मन्त्रिव्यसनोपक्रमाद्राजादीनां व्यसनान्याह—

वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च ।
पानं स्त्री मृगया द्यूतं व्यसनानि महीपतेः ॥ ३२० ॥

मन्त्रिव्यसनम्—

आलस्यं स्तब्धता दर्पः प्रमादोऽनुपकारिता ।
इति पूर्वोक्तदिष्टं च सचिवव्यसनं स्मृतम् ॥ ३२१ ॥

राष्ट्रव्यसनम्—

अतिवृष्टिरनावृष्टिः शलभा मूषिकादयः ।
स्वचक्रकृतदण्डश्च परचक्राणि तस्कराः ॥ ३२२ ॥

राजानीकप्रियोत्सर्गो मरकव्याधिपीडनम् ।
पशूनां मर(णं) रोगो राष्ट्रव्यसनमुच्यते ॥ ३२३ ॥

अथ कोशव्यसनम्—

व्ययीकृतः परिक्षिप्तो भक्षितोऽसंचितस्तथा ।
मूषितो दूरसंस्थश्च कोशव्यसनमुच्यते ॥ ३२४ ॥

अथ दुर्गव्यसनम्—

विशीर्णपर्णप्राकारपरिखाम्बुविशुष्कता ।
क्षीणघासेन्धनानीह दुर्गव्यसनमुच्यते ॥ ३२५ ॥

अथ बलव्यसनम्—

उपरुद्धं परिक्षिप्तमसमानितविमानितम् ।
आहतं व्याधितं श्रान्तं दूरयातं नवागतम् ॥ ३२६ ॥

परिक्षीणं प्रतिहतं प्रहताग्रजवं तथा ।
आशानिर्वेदभूयिष्ठमहतप्राप्तमेव च ॥ ३२७ ॥

विच्छिन्नाविविधासारं शून्यमूलं तथैव च ।
दुःपार्ष्णिग्राहमन्धं च बलव्यसनमुच्यते ॥ ३२८ ॥

व्यसन्यधोधो व्रजति तस्मात्तत्परिवर्जयेत् ।
हुताशनो जलं व्याधिर्दुर्भिक्षं मरकास्तथा ।
इति पञ्चविधं दैवं व्यसनं मानुषं परम् ॥ ३२९ ॥

दैवं पुरुषकारेण शक्त्या च प्रशमं नयेत् ।
उत्थायित्वेन नीत्या च मानुषं कार्यतत्त्ववित् ॥ ३३० ॥

कोशव्यसनस्य पूर्वोपक्रमात् तद्व्यसने किं भवतीत्याह कामन्दकः—

कोशमूलो हि राजेति प्रवादः सार्वलौकिकः ।
एतत्सर्वं जहातीह कोशव्यसनवान्नृपः ॥ ३३१ ॥

क्षीणं बलं वर्धयति स्वतो गृह्णाति च प्रजाः ।
कोशवान्पृथिवीपालः परैरप्युपजीव्यते ॥ ३३२ ॥

मित्रामित्राहिरण्यानां भूमीनां (च) प्रसारणम् ।
दूरकार्याशुकारित्वं लब्धस्य परिपालनम् ॥ ३३३ ॥

कोशादेतत्प्रभवति याति तद्व्यसने क्षयम् ॥ ३३४ ॥

पूर्वोक्तव्यसनमध्ये अमात्यव्यसनं गुरुतरमित्याह—

अमात्याद्याः प्रकृतयो भिन्नं तद्राष्ट्रमुच्यते ।
अशेषराज्यव्यसनात्पार्थिवव्यसनं गुरु ।
तस्मादमात्यव्यसनाप्यते... (?) ॥ ३३५ ॥

चतुर्विधं व्यसनं परित्यज्य स्वयमेव राज्यं कुर्यात्—

राज्ञो व्यसनिराज्यस्य व्यवसायो हि न क्षमः ।
न राज्यव्यसनायेह समग्रं राज्यमूर्जितम् ॥ ३३६ ॥

अथामात्यव्यसनतः कोशानां दण्डामित्रयोः ।
व्यसनेभ्यः समुद्धेता राजा यः स त्रिवर्गभाक् ॥ ३३७ ॥

तान्येव व्यसनान्याह--

वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च ।
पानं व्यसनतत्त्वज्ञैश्चतुर्विधमुदाहृतम् ॥ ३३८ ॥

तत्र वाक्पारुष्यम्—

वाक्पारुष्यं परं लोके उद्वेजकमनर्थकम् ।
न कुर्यात्प्रियया वाचा प्रकुर्याज्जगदात्मसात् ॥ ३३९ ॥

अकस्मादेव यः कोपादक्षिणं बहु भाषते ।
तस्मादुद्विजते लोकः सस्फुलिङ्गादिवानलात् ॥ ३४० ॥

हृदये वागसिस्तीक्ष्णो मर्म च्छिन्दन्यतन्मुहुः ।
तेजस्विनो दीपयति स दीप्तो याति वैरिताम् ॥ ३४१ ॥

नोद्वेजयेज्जगद्वाचा रूक्षवाचाप्रियोभवेत् ।
प्रायेण प्रियकृत्कर्मो कृपणोपि हि सेव्यते ॥ ३४२ ॥

अथ दण्डपारुष्यम्—

असिद्धसाधनं सद्भिः शासनं दण्डमुच्यते ।
तद्युक्त्यैव नयेद्दण्ड्यं युक्तदण्डः प्रशस्यते ॥ ३४३ ॥

उद्वेजयति भूतानि दण्डपारुष्यवान्नृपः ।
भूतान्युद्वेज्यमानानि द्विषतां यन्ति संश्रयम् ॥ ३४४ ॥

आश्रिताश्चैव लोकेन विवृद्धिं यान्ति विद्विषः ।
विवृद्धाश्च विनाशाय तस्मान्नोद्द्विजते प्रजाः ॥ ३४५ ॥

महत्स्वप्यपराधेषु दण्डं प्राणान्तिकं त्यजेत् ।
ऋते राज्यापहारात्तु युक्तदण्डः प्रशस्यते ॥ ३४६ ॥

अथार्थदूषणमाह—

दूष्यस्य दूषणार्थं च परित्यागो महीयसः ।
अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते ॥ ३४७ ॥

तदाकस्मात्समाविष्टः कोपेनातिबलीयसा ।
नित्यमात्महिताकाङ्क्षी न कुर्यादर्थदूषणम ॥ ३४८ ॥

अथ मृगयाव्यसनम्—

याने क्षोभो यानपातो यानाभिहरणं तथा ।
क्षुत्पिपासाश्रमायासः शीतवातोष्णपीडनम् ॥ ३४९ ॥

अभियानस्य संगत्या यानं व्यसनमुच्यते ।
दुःखं प्रतप्तसिकता कुशकण्टकभूमयः ॥ ३५० ॥

वृक्षसङ्कटतोद्देशाल्लताकण्टकपातनम् ।
वधबन्धपरिक्लेशः सामन्ताटविकादिभिः ॥ ३५१ ॥

स्वसैन्यैश्चास्वसैन्यैश्च परिभिन्नार्निवारणम् ।
ऋक्षनागोथ(?)मातङ्गसिंहव्याघ्रभयानि च ॥ ३५२ ॥

वनाग्निधूमसंहारो दिङ्मोहभ्रमणानि च ।
इत्यादि पृथिवीन्द्राणां मृगयाव्यसनं स्मृतम् ॥ ३५३ ॥

मृगयायां गुणा अपि सन्ति कथं व्यसनमेवेत्युक्तम् । तदुक्तम्—

जितश्रमत्वमायाम आममेदकफक्षयः ।
चरास्थिरेषु लक्ष्येषु बाणसिद्धिरनुत्तमा ॥ ३५४ ॥

आमादयो हि जीर्यन्ते योगेनैव दिवानिशम् ।
चरेषु(ष्व)व(च)रलक्ष्ये(षु)बाणासिद्धिश्च जायते ॥ ३५५ ॥

तथाप्यन्ततो दुष्टत्वात्त्याज्येत्याह—

दोषाः प्राणहराः प्रायस्तस्मात्तद्व्यसनं महत् ।
अतः सा परिहर्तव्या राज्ञा भूतिं समीप्सता ॥ ३५६ ॥

अभ्यनुज्ञामप्याह —

अथ चेन्मृगयाक्रीडां वाञ्छेत नगरान्तिके ।
कारयेन्मृगयारण्यं क्रीडार्ते(हे)तोर्मनोरमम् ॥ ३५७ ॥

आयामपरिणाहाभ्यामर्धयोजनसंमितम् ।
गिरेरुपान्ते नद्या वा पर्याप्तजलशाद्वलम् ॥ ३५८ ॥

अकण्टकलतागुल्मविषयादपवर्जितम् ।
पादपैः पुष्पफलदैर्विज्ञातैश्चित्तहारिभिः ॥ ३५९ ॥

स्निग्धशीतघनच्छायैर्विकोशैरुपशोभितम् ।
मृगसंघातनिपुणं हस्तिनीकलभान्वितम् ॥ ३६० ॥

अगम्यं रिपुसैन्यानां मानप्रीतिविवर्धनम् ।
तद्वनं चास्य चित्तज्ञैः क्लेशपाशसहैर्दृढैः ।
रक्षितं रक्षिभिः स्वाप्तैर्भूभुजां भूरिभूतये ॥ ३६१ ॥

अन्यकार्याविरोधेन प्रातः संक्रमणक्षमः ।
क्रीडनाय विशेद्राजा तदाप्तैः सहजैर्मतैः ॥ ३६२ ॥

यदा च प्रविशेद्राजा क्रीडनार्थं तदा बहिः ।
संनद्धं यत्नतास्तिष्ठद्बलं वनवताश्विरम् ॥ ३६३ ॥

विधिरेवं समुद्दिष्टो मृगयाक्रीडने परः ।
न गच्छेदन्यथा राजा मृगयायां कदाचन ॥ ३६४ ॥

अथ सर्वव्यसनै रहितो राजा पुरं प्रति यायात् । तदुक्तं कामन्दके—

नानाप्रकारैर्व्यसनैर्विमुक्तः शक्तित्रयेणाप्रतिमेन युक्तः ।
परं दुरन्तव्यसनेनपनं(नोपपन्नं) यायान्नरेन्द्रो विजयाभिकाङ्क्षी॥३६५

प्रायेण सन्तो व्यसने रिपूणां यातव्यमित्येव समादिशन्ति ।
य(दा) क्षमस्तु प्रसभं निहन्तुं पराक्रमादूर्जितमप्यमित्रम् ॥ ३६६ ॥

तदैव यायादहितान्हि कुर्वन्नप्यन्तराकर्षणपीडनानि ।
संपन्नसस्यं विषयं परस्य यायात्प्रमृद्नन्विजयाय राजा ॥ ३६७ ॥

सस्योपघातेन परस्य वृत्तिच्छेदः स्वसै(न्यो)पचयश्च साधु ।
सुवीवृधासारविशुद्धमार्गा विशेद्धरित्रीं द्विषतोप्रमत्तः ॥ ३६८ ॥

समे प्रदेशे विषमे च भूमेर्मिश्रे स्थले वा सुमुखेन यायात् ।
अनातुरः सन्नभयो हि विद्वान्संनद्धगल्फो(सैन्यो)
विहितान्नतोयः ॥ ३६९ ॥

ग्रीष्मे प्रभूतान्नबलेन यायान्निर्दासनार्थं करिणां यथाम्बु ।
ऋतेम्भसांद्ग्रीष्मकृतात्प्रतापाद्भवन्ति कुष्टानि मतङ्गजानाम् ॥३७०॥

स्वस्थक्रियाणाममपि कुञ्जराणामुष्मा शरीरमभिजाज्वलीति ।
आयासयोगेन हि संप्रवृद्धः प्रसह्य हन्ति द्विरदान्प्रतापः ॥ ३७१ ॥

सर्वाणि सत्त्वानि खलूष्मकाले विनाम्बुना यान्ति परामवस्थाम् ।
सुगन्धिदानस्तुतिसीकरेषु दन्ताभिघातस्फुटितोपलेषु ॥ ३७२ ॥

गजेषु नीलाभ्रसमप्रभेषु राज्यं निरुद्धं पृथिवीपतीनाम् ।
संकल्पितः संयुगदृष्टमार्गो स्वधिष्ठितो धीरतरेण पुंसाम् ॥ ३७३ ॥

तुरंगमाणां प्र(ति)कल्पितानामेको गजः षष्टिशतानि हन्ति ।
तस्माद्यतो भूरिजलस्तु पन्था यतोन्नपानोपचितो विशङ्कः ॥ ३७४ ॥

तेनाभियायाज्जनयन्प्रतापं शनैः शनैरश्रमयन्बलानि ।
न ह्युन्नतानामणिनप्युदारं पश्चात्प्रकोपं जनयेदरीणाम् ॥ ३७५ ॥

तं चाप्रमत्तः प्रसमीक्ष्य यायान्न नाशयेद्दृष्टमदृष्टहेतोः ।
पश्चात्प्रकोपः पुरतः फलं हि पश्चात्प्रकोपश्च ततो गरीयान् ॥ ३७६ ॥

पुरश्च पश्चाच्च यदा समर्थस्तदाभियायान्महते फलाय ॥ ३७७ ॥

अवश्ययातव्ये रिपौ पश्चात्प्रकोपशङ्कायां किं कुर्यादित्याह—

अवश्ययातव्यतयोद्यतः सन्पश्चात्प्रकोपाहितयानशङ्कः ।
सेनापतिं वाप्यथवा कुमारं बलैकदेशेन पुरो निदध्यात् ॥ ३७८ ॥

अभ्यन्ताराद्दाह्यकृताच्च दोषादभ्यन्तरस्त्वेव तयोर्गरीयान् ।
आदाय गच्छेत बहिःप्रचारांस्तान्मान्त्रिभिः सम्यगुपाददीत ॥ ३७९ ॥

सामादिभिः संशमयेत्प्रकोपं परस्परावग्रहभेदनैश्च ॥ ३८० ॥

एवं प्रस्थाय किं कुर्यादित्याह—

यायाद्वैरिपुराभ्याशं भूभागे साधुसंमते ।
स्कन्धावारनिवेशज्ञः स्कन्धावारं निवेशयेत् ॥ ३८१ ॥

चतुरस्रं चतुर्द्वारं नातिविस्तारसङ्कटम् ।
साट्टप्रतोलीप्राकारं महाखनिसमावृतम् ॥ ३८२ ॥

शृङ्गाटमर्धचन्द्रं च मण्डलं दीर्घमेव च ।
भूमिप्रदेशसामर्थ्यादाकारमुपकल्पयेत् ॥ ३८३ ॥

विभक्तैश्च विविक्तैश्च पार्श्वैरान्वितमायतैः ।
गुप्तं पक्षपुटाकारं महामात्रासमावृतम् ॥ ३८४ ॥

तस्य मध्ये मनोह्लादि महन्मेलवदाहृतः ।
अन्तःकोशबलोपेतं कारयेद्राजमन्दिरम् ॥ ३८५ ॥

मौलीभूतश्रेणिसुहृद्द्विषदाटाविकं बलम् ।
राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत् ॥ ३८६ ॥

अन्तश्चागणितक्रूरालुब्धकादुष्टकर्मणः ।
पर्याप्तवेतनानाप्तान्मण्डले विनिवेशयेत् ॥ ३८७ ॥

हस्तिनो बध्यमानास्तु तुरंगाश्च मनोजवाः ।
गृहोपकण्ठे नृपतेर्वसेयुः स्वाप्तरक्षिताः ॥ ३८८ ॥

यामवृत्त्या सुसंनद्धं रात्रिंदिवमुदाहृतम् ।
अन्तर्वंशिकसैन्यं च तिष्ठेदारात्रिगुप्तये ॥ ३८९ ॥

युद्धयोग्यो महादन्ती संनद्धः साध्ववस्थितः ।
तिष्ठेन्नरपतेर्द्वारि वेगवांश्च तुरंगमः ॥ ३९० ॥

सैन्यैकदेशसंनद्धः सेनापतिपुरःसरः ।
प्रयत्नवान्परिपतेन्मण्डलेन बहिर्निशि ॥ ३९१ ॥

परसैन्यविनाशार्थं सर्वां भूमिं विनाशयेत् ॥ ३९२ ॥

क्वचित्कण्टकशाखाभिः क्वचित्कीलैरधोमुखैः ।
भू(दू)षयेत्परितो भूमिं प्रच्छन्नैः प्रदरैरपि ॥ ३९३ ॥

इति याननिरूपणं साङ्गतो निरूपितम् ।

अलब्धमीहेद्धर्मेण लब्धं यत्नेन पालयेत् ।
पालितं वर्धयेन्नित्या वृद्धं पात्रेषु निक्षिपेत् ॥ ३९४ ॥

नातः परतरो धर्मो नृपाणां यद्रणेर्जितम् ।
विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा ॥ ३९५ ॥

तवाहं वादिनं क्लीबं निर्हेतिं परसङ्गतम् ।
न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकं तथा ॥ ३९६ ॥

ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्षोभनोरिषु ।
स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥ ३९७ ॥

पुण्यात्षड्भागमादत्ते न्यायेन परिपालयेत् ।
सर्वदानाधिकं यस्मान्प्रजानां परिपालनम् ॥ ३९८ ॥

शत्रुतस्करदुर्वृत्तमहासाहसिकादिभिः ।
पीड्यमानाः प्रजा रक्षेत्कायस्थैश्च विशेषतः ॥ ३९९ ॥

अरक्ष्यमाणाः कुर्वन्ति यत्किंचित्किल्बिषं प्रजाः ।
तस्मात्तु नृपतेरर्धं यस्माद्गृह्णात्यसौ करान् ॥ ४०० ॥

ये राष्ट्रेधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितम् ।
साधून्संमानयेद्राजा विपरीतांश्च घातयेत् ॥ ४०१ ॥

उत्कोचजीविनो द्रव्यहीनान्कृत्वा विवासयेत् ।
स दानमानसत्कारैः श्रोत्रियान्वासयेत्सदा ॥ ४०२ ॥

अन्यायेन नृपो राष्ट्रात् स्वकोशं योभिवर्धयेत् ।
सोचिराद्विगतश्रीको नाशमेति सबान्धवः ॥ ४०३ ॥

प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञः श्रियं बलं प्राणानदग्ध्वा न निवर्तते ॥ ४०४ ॥

य एव नृपतेर्धर्मः स्वराष्ट्रपरिपालने ।
तमेव कृत्स्नमाप्नोति परराष्ट्रं वशं नयन् ॥ ४०५ ॥

किंतु यस्मिन्य आचारो व्यवहारः कुलस्थितिः ।
तथैव परिपाल्योसौ यथावंशमुपागतः ॥ ४०६ ॥

मन्त्रमूलं यतो राज्यमतो मन्त्रं सुरक्षितम् ।
कुर्याद्यथास्य न विदुः कर्मणामाफलोदयात् ॥ ४०७ ॥

दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता ।
तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ॥ ४०८ ॥

केचिद्दैवात्स्वभावाच्च कालात्पुरुषकारतः ।
संयोगे केचिदिच्छान्ति फलं कुशलबुद्धयः ॥ ४०९ ॥

यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ ४१० ॥

क्रोधं कुर्यान्न चाकस्मान्मृदुवागुपकारिषु ।
एवं च राजा राज्यस्थो यदि श्रेय इहेच्छति ॥ ४११ ॥

अतोन्यथा नरपतिर्भयमभ्येत्यनुत्तमम् ।
इति सर्वान्गुणानेतान्यथोक्तान्योनुवर्तते ।
अनुभूयेह भद्राणि प्रेत्य स्वर्गे महीयते ॥ ४१२ ॥

उक्तं च भारते--

न पुत्रायतमैश्वर्यं कुर्याद्राजा कथंचन ।
पुत्रार्पितप्रभुत्वो हि धृतराष्ट्रस्तृणोपमः ॥ ४१३ ॥

कामं क्रोधं मदं मानं लोभं हर्षं तथैव च ।
एते वर्ज्याः प्रयत्नेन सुतरां पृथिवीक्षिता ॥ ४१४ ॥

एतेषां विजयं कृत्वा कार्यो भृत्यजयस्ततः ।
कृत्वा भृत्यजयं राजा पौरजानपदान्व्रजेत् ॥ ४१५ ॥

तदुक्तम्—

आत्मानं प्रथमं राजा विनयेनोपपातयेत् ।
ततो भृत्यांस्ततोमात्यांस्ततः पुत्रांस्ततः प्रजाः ॥ ४१६ ॥

कृत्वा तु विजयं तेषां शत्रून्बाह्यांस्ततो जयेत् ।

तेषा क्रोधादीनाम् ।

बाह्यास्तु त्रिविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः ॥ ४१७ ॥

षडङ्गरक्षा कर्तव्या तथानेन प्रयत्नतः ।

अङ्गान्युक्तानि ।

अङ्गेभ्यो यस्त्वथैकोपि द्रोहमाचरतेल्पधीः ।
वधस्तस्य तु कर्तव्यः शीघ्रमेव महीक्षिता ॥ ४१८ ॥

न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः ॥ ४१९ ॥

काले मृदुर्यो भवति काले भवति दारुणः ।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ॥ ४२० ॥

भृत्यैः सह महीपालः परिहासं च वर्जयेत् ।
भृत्याः परिभवन्तीह नृपं * * * संकथम् ॥ ४२१ ॥

व्यसनानि च सर्वाणि भूपतिः परिवर्जयेत् ।
सप्तदोषा सदा राज्ञा हातव्या व्यसनोदयाः ॥ ४२२ ॥

प्रायशोर्थे विनश्यन्ति धृतमूला अपीश्वराः ॥ ४२३ ॥

तानि च व्यसनानि—

स्त्रियोक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम् ।
तथैव दण्डपारुष्यमर्थदूषणमेव च ॥ ४२४ ॥

कामं क्रोधं च वर्जयादित्युक्तं तत्र मूलमाह

मृगयाक्षा दिवास्वापः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्याग्रः कामजो दशको गणः ॥ ४२५ ॥

पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणे ।
वाग्दण्डजं च पारुष्यं क्रोधजोपि गणोऽष्टकः ॥ ४२६ ॥

दण्डस्य पातनं चैव शाकपाकस्यार्थदूषणे ।
क्रोधजेपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ॥ ४२७ ॥

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥ ४२८ ॥

व्यसनानि वर्जयेदस्यापवादमाह--

लोकसंग्रहणार्थं च पूजनार्थं यशस्करी भवेत्
शौण्डीरस्य नृपेन्द्रस्य नित्यमुत्सिक्तचेतसः ॥ ४२९ ॥

जनो विरागमायाति सदा दुःखेष्वभाजनः ।
तस्मात्पूर्वाभिभाषी स्यात्सर्वस्यापि महीपतिः ॥ ४३० ॥

अदीर्घसूत्रश्च भवेत्कार्येष्वेषु पार्थिवः ।
दीर्घसूत्रस्य नृपतेः कर्महानिर्भवेद्ध्रुवा ॥ ४३१ ॥

अस्यापवादमाह—

रागे दर्पे च माने च द्रोहे पापे च कर्मणि ।
अप्रिये चैव कर्तव्ये दीर्घसूत्रः प्रशस्यते ॥ ४३२ ॥

पौरुषं दैवसंपत्त्या काले फलति पार्थिवे ॥ ४३३ ॥

दैवं पुरुषकारश्च कालश्च मनुजोत्तम ।
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात्फलप्रदम् ॥ ४३४ ॥

कृष्टिवृष्टिसमायोगाद् दृश्यन्ते फलसिद्धयः ।
ताश्च काले प्रदृश्यन्ते नैवाकाले कथंचन ॥
तस्मात्सदैव कर्तव्यं सधर्मं पौरुषं बुधैः ॥ ४३५ ॥

साम भेदस्तथा दानं दण्डश्च मनुजोत्तम ।
उपेक्षा च तथा मायाः इन्द्रजालं च पार्थिव ॥ ४३६

द्विविधं कथितं साम तथ्यं चातथ्यमेव च ।
तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते ।
तत्र साधुः प्रयत्नेन सामसाध्यो नरोत्तम ॥ ४३७ ॥

ये शुद्धवंशा ऋजवः प्रतीता धर्मे स्थिता धर्मरता विनीताः ।
ते सामसाध्याः पुरुषाः प्रदिष्टा अनुव्रता ये सततं च राजन् ॥४३८॥

अथ भेदः—

परस्परं ये (वि)द्विष्टाः क्रुद्धा भीता विमानिताः ।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः ॥ ४३९ ॥

अन्तःकोपो बाहिःकोपो यत्र स्यातां महीक्षिताम् ।
अन्तःकोपो महांस्तत्र नाशकः पृथिवीक्षिताम् ॥ ४४० ॥

सामन्तकोपो बाह्यस्थकोपः प्रोक्तो मनीषिभिः ।
महिषीयुवराजाभ्यां तथा सेनापतेर्द्विज ॥ ४४१ ॥

अमात्यमन्त्रिणां चैव राजपुत्रे नथैव च ।
अन्तःकोपो विनिर्दिष्टो दारुणः पृथिवीक्षिताम् ॥ ४४२ ॥

इति भेदः । अथ दानम्—

सर्वेषामप्युपायानां दानं श्रेष्ठतमं महत् ।
सुदुस्तेन समायाति दानेनोभयलोकजित् ॥ ४४३ ॥

न केवलं दानपरा जयन्ति भूर्लोकमेकं पुरुषप्रवीराः ।
जयन्ति ते राजसुरेन्द्रलोकं सुदुर्जनं(यं) यद्धनुषा तथैव ॥ ४४४ ॥

इति दानस्वरूपकथनम् । दण्डस्वरूपं निरूप्यते—

न शक्या ये वशीकर्तुमुपायत्रितयेन तु ।
दण्डेन तान्वशीकुर्याद्दण्डो हि वशकृन्नृणाम् ॥ ४४५ ॥

आश्रमी यदि वा वर्णी पूज्यो वाथ गुणि(रु)र्महान् ।
नादण्ड्यो नाम राज्ञोस्ति स्वधर्मे वावातिष्ठति ॥ ४४६ ॥

एवं सांसिद्धिकं लोके सर्वं दण्डे प्रतिष्ठितम् ।
अन्धे तमसि मज्जेत यदि दण्डं न पातयेत् ॥ ४४७ ॥

यस्माद्दण्ड्यं दण्डयति दुर्मदान्दमयत्यपि ।
दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः ॥ ४४८ ॥

तदवाप्य नृपो दण्डं दुर्वृत्तेषु निपातयेत् ।
धर्मो हि दण्डरूपेण ब्रह्मणा निर्मितः पुरा ॥ ४४९ ॥

स नेतुं न्यायतः शक्योऽलुब्धेन कृतबुद्धिना ।
सत्यसंधेन शुचिना ससहायेन धीमता ॥ ४५० ॥

यथाशास्त्रं प्रयुक्तः सन् सदेवासुरमानुषम् ।
जगदानन्दयेत्सर्वमन्यथा तत्प्रकोपयेत् ॥ ४५१ ॥

अधर्मदण्डनं स्वर्गकीर्तिलोकविनाशनम् ।
सम्यक्तु दण्डनं राज्ञः स्वर्गकीर्तिजयावहम् ॥ ४५२ ॥

साहसस्तेयपारुष्यगोभिशापात्ययं स्त्रियाम् ।
विवादयेत्सय एव कालोन्यत्रेच्छया स्मृतः ॥ ४५३ ॥

देशाद्देशान्तरं याति सृक्किणी परिलेढि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेव(ति) च ॥ ४५४ ॥

परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक्चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि ॥ ४५५ ॥

स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ॥
अभियोगे च साक्ष्ये वा दुष्टः स परिकीर्तितः ॥ ४५६ ॥

दण्डादेतत्प्रभवति याति तद्व्यसने क्षयम् ।
अरयोऽपि हि मित्रत्वं यान्ति दण्डवतो ध्रुवम् ॥ ४५७ ॥

दण्डप्रायो हि नृपतिर्धुत्वा चाक्रम्य मेदिनीम् ।
संस्तम्भयति मित्राणि अमित्रान्नाशयत्यपि ॥ ४५८ ॥

कामन्दकः—

अनुबन्धं परीक्ष्यादौ देशकालौ च तत्त्वतः ।
सारापराधावालोक्य दण्डं दण्ड्येषु पातयेत् ॥ ४५९ ॥

आगःस्वपि तथान्येषु ज्ञात्वा जातिं धनं वयः ।
दण्डं प्रकल्पयेद्राजा सामन्तब्राह्मणैः सह ॥ ४६० ॥

दण्डभेदानाह—

धिग्दण्डस्त्वथ वाग्दण्डो धनदण्डो वधस्तथा ।
योज्याः समस्ता व्यस्तास्तु ह्यपराधवशादिमे ॥ ४६१ ॥

वाग्धिग्वधः स्वकं चैव चतुर्धा वार्तितो दमः ।
पुरुषे दोषविभवं ज्ञात्वा संपरिकल्पयेत् ॥ ४६२ ॥

अपराधवशान्नियोजयेदित्युक्तं तत्र कस्मिन्कं नियोजयेदित्याह—

गुरून्पुरोहितान्विप्रान्वाग्दण्डेनैव दण्डयेत् ।
विवादिनो नरांश्चान्यान् दोषिणोऽर्थेन दण्डयेत् ।
महापराधयुक्तांश्च वधदण्डेन दण्डयेत् ॥ ४६३ ॥

किंच—

मित्रादिषु प्रयुञ्जीत वाग्दण्डं धिक् तपस्विषु ।
यथोक्तं तस्य तत्कुर्युरनुक्तं साधुकल्पितम् ॥ ४६४ ॥

अधार्मिकं त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः ।
निरोधनेन बन्धेन विविधेन वधेन च ॥ ४६५ ॥

दण्डस्थानान्याह—

दशस्थानानि दण्डस्य मनुः स्वायंभुवोऽब्रवीत् ।
त्रिषु वर्णेषु तानि स्युरक्षतो ब्राह्मणो व्रजेत् ॥ ४६६ ॥

तानि दशस्थानान्याह—

उपस्थमुदरं जिव्हा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासे च कर्णौ च धनं देहस्तथैव च ॥ ४६७ ॥

मौण्ड्य प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
पुरुषाणां कुलीनानां नारीणां च विशेषतः ॥ ४६८ ॥

अवध्यान्ब्राह्मणानाहुः सर्वपापेष्ववस्थितान् ।
यदध्य(स्या)कुशलं यन्नान्न तद्राजा समाचरेत् ।
राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ॥ ४६९ ॥

एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन्प्रथते लोके स्वर्गे वासस्तथाक्षयः ॥ ४७० ॥

ब्राह्मणप्रशंसामाह—

इयं वसुंधरा देवा धर्मेण खलु धार्यते ।
ध्रुवं सा धार्यते वेदैस्ते धार्यन्ते द्विजातिभिः ॥ ४७१ ॥

अतः सर्वस्य लोकस्य मूलमेते द्विजातयः ।
पालनीयाः प्रयत्नेन पूजनीयाश्च सर्वदा ॥ ४७२ ॥

सुराणां भूसुराणां च सुरभीणां च पालनम् ।
युगे युगे च ये धर्मास्तेषु धर्मेषु ये द्विजाः ॥ ४७३ ॥

आक्रम्य ब्राह्मणैर्युक्तैः परिक्षीणैश्च बान्धवैः ।
मोभिश्च नृपशार्दूल राजसूयाद्विशिष्यते ॥ ४७४ ॥

अभिषिक्तस्य राज्ञः दण्डधारणप्रकारमाह—

अव्रता ह्यनधीयाना यत्र भैक्ष्यचरा द्विजाः ।
तं ग्रामं दण्डयेद्राजा चोरभक्तप्रियो हि सः ॥ ४७५ ॥

यो योनर्णो महीयेत यश्चेदेकमनुव्रजेत् ।
तं तं दृष्ट्वा स्वतो मार्गात्प्रच्युतं स्थापयेत्पथि ॥ ४७६ ॥

अशास्त्रोक्तेषु चान्येषु पापयुक्तेषु कर्मसु ।
प्रसमीक्ष्यात्मना राजा दण्डं दण्ड्येषु पातयेत् ॥ ४७७ ॥

कुलानि जातिश्रेणीश्च गणान्जानपदानपि ।
स्वधर्माच्चलितान्व्रात्यान्विनये स्थापयेत्पथि ॥ ४७८ ॥

पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः ।
नादण्ड्यो नाम राज्ञोस्ति धर्माद्विचलितः स्वकात् ॥ ४७९ ॥

दण्ड्यदण्डनप्रशंसामाह—

यो दण्ड्यान्दण्डयेद्राजा सम्यग्वध्यांश्च घातयेत् ।
इष्टं स्याद्यज्वभिस्तेन समाप्तवरदक्षिणैः ॥ ४८० ॥

अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति ॥ ४८१ ॥

प्रकारान्तरेण दण्डस्य द्वैविध्यमाह—

शारीरश्चार्थदण्डश्च दण्डः स्याद्द्विविधः स्मृतः ।
शारीरस्ताडनादिस्तु मरणान्तः प्रकीर्तितः ।
काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च ॥ ४८२ ॥

अराजके हि लोकेस्मिन्सर्वतो विद्यते भयम् ।
रक्षार्थमस्य सिद्धस्य राजानमसृजत्प्रभुः ॥ ४८३ ॥

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥ ४८४ ॥

यस्मादेषां सुरेन्द्राणां मात्राभिर्निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ॥ ४८५ ॥

दण्डप्रणयनार्थाय राजा सृष्टः स्वयंभुवा ।
देवभागानुपादाय सर्वभूतानुगुप्तये ॥ ४८६ ॥

तेजसा यदमुं कश्चिन्नैव शक्नोति वीक्षितुम् ।
तदा भवति लोकेस्मिन्राजा भास्करवत्प्रभुः ॥ ४८७ ॥

यदास्य दर्शनाल्लोकः प्रसादमुपगच्छति ।
नयनानन्दकारित्वात्तदा भवति चन्द्रमाः ॥ ४८८ ॥

यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा राज्ञा विधातव्याः प्रजास्तद्धि यमव्रतम् ॥ ४८९ ।

वरुणेन यथा पाशैर्बद्ध एव प्रदृश्यते ।
तथा पापान्निगृह्णीयाद्व्रतमेतद्धि वारुणम् ॥ ४९० ॥

यथा सर्वाणि भूतानि धरा धारयते स्वयम् ।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥ ४९१ ॥

इन्द्रस्यार्कस्य वायस्य यमस्य वरुणस्य च ।
चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत् ॥ ४९२ ॥

वार्षिकांश्चतुरो मासान् यथेन्द्रोप्यभिवर्षति ।
तथाभिवर्षन्स्वं राज्यं कामानिन्द्रव्रतं स्मृतम् ॥ ४९३ ॥

अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः ।
तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥ ४९४ ॥

प्रविश्य सर्वभूतानि यथा चरति मारुतः ।
तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥ ४९५ ॥

ज्ञात्वापराधं पुरुषं च लोके विचार्य सभ्यैर्विदुषैः (?) समग्रम् ।
दण्डयेषु दण्डं परिकल्पयेत पापस्य यद्यच्छमनं प्रकुर्यात् ॥ ४९६ ॥

दूषा(ष्या)नुपांशुदण्डेन हन्याद्राजाविलम्बितम् ।
अदृष्टघातं कुर्वीरन्ये पापा राजवल्लभाः ॥ ४९७ ॥

यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोशे जनपदे दण्डे न स राज्येवतिष्ठते ॥ ४९८ ॥

यस्त्वेतानि प्रमाणानि यथोक्तान्यनुपश्यति ।
युक्तो धर्मार्थयोग्यानि स राज्यमधिगच्छति ॥ ४९९ ॥

न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतम् ।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम् ॥ ५०० ॥

वनस्पतेरपक्वानि फलान्यवचिनोति यः ।
स नाप्नोति रसं तेभ्यो बीजं तस्य विनश्यति ॥ ५०१ ॥

यस्तु पक्वमुपादत्ते काले परिणतं फलम् ।
फलाद्रसं स लभते बीजाच्चैव फलं पुनः ॥ ५०२ ॥

यथा मधु समादत्ते रक्षन्पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया ॥ ५०३ ॥

पुष्पं पुष्पं विचिन्वन्ति मूलच्छेदं न कारयेत् ।
मालाकार इवारामे न यथाङ्गारकारकः ॥ ५०४ ॥

उत्खातान्प्रतिरोपयन्परिमितान्चिन्वन्लघून्वर्धयन्
प्रोत्तुङ्गान्नमयन्नतान्समुदयन्विश्लेषयन्संहतान् ।
क्षुद्रान्कण्टकिनो बहिर्विनिम * न्म्लानान्मुहुः सिञ्चयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नन्दतु ॥ ५०५ ॥

अपक्वः पक्वसंकाशो न च सीदेत कस्यचित् ।
सुपुष्पितः स्यादफलः फलितः स्योद्दुरारुहः ॥ ५०६ ॥

चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।
प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति ॥ ५०७ ॥

यस्माद्भ्रश्यन्ति भूतानि मृगव्याधान्मृगा इव ।
सागरान्तामपि महीं लब्ध्वा स परिहीयते ॥ ५०८ ॥

पितृपैतामहं राज्यं प्राप्तं वा स्वेन तेजसा ।
वायुरभ्रमिवासाद्य भ्रंशयत्यनयस्थितः ॥ ५०९ ॥

धर्ममाचरतो राज्ञः षाड्गुण्येश्वरितमानसः ।
वसुधा वसुसंपूर्णा वर्तते भूतिवर्धिनी ॥ ५१० ॥

अथ संत्यजतो धर्मम् धर्ममनुतिष्ठतः ।
प्रतिसंवेष्टते भूमिरग्नौ चर्ममिवाहितम् ॥ ५११ ॥

अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।
अकाले मन्त्रभेदाच्च येन माद्येन्न तत्पिबेत् ॥ ५१२ ॥

धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ ५१३ ॥

वाक्सायका वदनान्निःपतन्ति यैराहतः शोचति रात्र्यहानि ।
परस्परो मर्मसु ते पतन्ति तान्पण्डितो नावसृजेषु * * * ॥ ५१४

यथा यथा हि पुरुषः कल्याणे कुरुते मतिः
तथा तथास्य सर्वार्थाः शिष्यन्ते नात्र संशयः ॥ ५१५ ॥

श्रीर्मङ्गलात्संभवति प्रागल्भ्यात्संप्रवर्धते ।
दाक्ष्यात्तु कुरुते मूलं संयमात्प्रतितिष्ठति ॥ ५१६ ॥

संभाव्यं गोषु संपन्नं संभाव्यं ब्राह्मणे तपः ।
संभाव्यं स्त्रीषु चापल्यं संभाव्यं ज्ञातितो भयम् ॥ ५१७ ॥

ब्राह्मणेषु च ये धीराः स्त्रीषु ज्ञातिषु गोषु च ।
वृक्षादिव फलं पक्वं धृतराष्ट्र पतन्ति ते ॥ ५१८ ॥

धूमायन्ते व्यपेतानि ज्वलन्ते संहतानि च ।
धृतराष्ट्रोलमुकानीव ज्ञातयो भरतर्षभ ॥ ५१९ ॥

यस्मिन्यथा वर्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया बाधितव्यः साध्वाचारः साधुना प्रत्युपेयः॥५२०॥

द्यूतमेतत्पुराकल्पे दृष्टं वैरकरं नृणाम् ।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥ ५२१ ॥

वाक्यं तु यो नाद्रियतेनुशिष्टः प्रत्याह यश्चापि नियुज्यमानः ।
प्रज्ञाभिमानी प्रतिकूलवादी त्याज्यः सदा दुर्धर एष भृत्यः ॥ ५२२ ॥

बलं पञ्चविधं लोके पुरुषाणां निबोध मे ।
यत्र बाहुबलं नाम कनिष्ठं बलमुच्यते ॥ ५२३ ॥

अमात्यलाभो भद्रं ते द्वितीयं बलमुच्यते ।
तृतीयं धनलाभं तु बलमाहुर्मनीषिभिः(णः) ॥ ५२४ ॥

यच्चास्य सहजं राजन्पितृपैतामहं बलम् ।
अभिजातबलं नाम तच्चतुर्थं बलं स्मृतम् ॥ ५२५ ॥

येन त्वेतानि सर्वाणि संगृहीतानि भारत ।
यद्बलानां बलं श्रेष्ठं तत्प्रज्ञाबलमुच्यते ॥ ५२६ ॥

अमोघह * * र्षस्य स्वर्य(यं) कृत्यानुवेक्षिणः ।
आत्मप्रत्ययकोशस्य वसुदैव वसुंधरा ॥ ५२७ ॥

अतिसंक्षीणकोशोपि लभते परिवारणम् ।
धृतिः शमो दमः शौचं कारणं वारनिष्टुराः (?) ॥ ५२८ ॥

मित्राणां चानभिद्रोहः सततैताः समिधः श्रियः ।
असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः ॥ ५२९ ॥

ताहङ्नराधिपो लोके वर्जनीयो जनाधिप ।
न शत्रुरङ्कमा(साद्य) मोक्तव्यो वध्यतां गतः ॥ ५३० ॥

आहताद्धि भयं तस्मात्संभवत्यचिरादिह ।
यत्र स्त्री यत्र कितवो बालो यत्रानुशासिता ॥ ५३१ ॥

मज्जन्ति तेवशा राजन् नद्यामश्मप्लवा इव ।
न वृत्तिर्बहुमन्तव्या या वृत्तिः क्षयमावहेत् ॥ ५३२ ॥

क्षयोपि बहुमन्तव्यो यः क्षयो बुद्धिमावहेत् ।
न स क्षयो महाराज यः क्षयो बुद्धिमावहेत् ॥ ५३३ ॥

क्षयः स इह मन्तव्यो यं लब्ध्वा बुद्धिमावहेत् ।
समृद्धा गुणतः केचित् भवन्ति धनिनोपरे ॥ ५३४ ॥

धनवृद्धान्गुणैर्हीनान् धृतराष्ट्र विवर्जय ।
ज्ञायेत वर्धनीयास्तैर्य इच्छन्त्यात्मनः परम् ॥ ५३५ ॥

कुलवृद्धिं च राजेन्द्र तस्मात्साधु समाचर ।
सुखानि सह भोज्यानि ज्ञातिभिर्भरतर्षभ ॥ ५३६ ॥

संबोधनं संकथनं संप्रीतिश्च परस्परम् ।
ज्ञातयस्तारयन्तीह ज्ञातयो मज्जयन्ति च ॥ ५३७ ॥

मन्त्रभेदस्य षट् प्राज्ञो ज्ञाता(द्वारा)ण्येतानि रक्षयेत् ।
अर्थसंततिकामश्च रक्षेदेतानि नित्यशः ॥ ५३८ ॥

मदः स्वप्नमविज्ञानमाकारं चात्यसंशयम् ।
दुष्टामात्येषु विश्रम्भं दूताच्चाकुशलादपि ॥ ५३९ ॥

द्वाराण्येतानि यो ज्ञात्वा संवृणोति सदा नृपः ।
त्रिवर्मचरणे युक्तः स शत्रूनधितिष्ठति ॥ ५४० ॥

न वै श्रुतमविज्ञाय वृद्धाननुपसेव्य च ।
धर्मार्थौ वेदितुं शक्यौ बृहस्पतिसमैरपि ॥ ५४१ ॥

राजोपसेवितं वैद्यं धार्मिकं प्रियदर्शनम् ।
मित्रवन्तं स्ववाक्यं च सुहृदं परिपालयेत् ॥ ५४२ ॥

दुःकुलीनः कुलीनो वा मर्यादां यो न लङ्घयेत् ।
धर्मापेक्षी मृदुर्ह्रीमान् स कुलीनः शताध्वरः ॥ ५४३ ॥

आपदां प्रतिकारज्ञो तदात्वे दृढनिश्चयः ।
अतीते कार्यशेषज्ञो नरोऽर्थैर्न प्रहीयते ॥ ५४४ ॥

कामं तदुपसेवेत न मूढव्रतमाचरेत् ।
दुःखार्तेष्वप्रशान्तेषु नास्तिकेष्वलसेषु च ॥ ५४५ ॥

न श्रीर्वसत्यदान्तेषु ये चोत्साहविवर्जिताः ।
अत्यार्यमतिदातारमतिशूरमतिप्रियम् ॥ ५४६ ॥

प्रज्ञाभिमानिनं चैव श्रीर्भयान्नोपसर्पति ।
न चातिगुणवत्स्वेषा नात्यन्तं निर्गुणेषु च ॥ ५४७ ॥

उन्मत्ता गौरिवान्धा श्रीः क्वचिदेवावतिष्ठते ॥ ५४८ ॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्त आयुः प्रज्ञा यशो बलम् ॥ ५४९ ॥

अतिक्लेशेन येर्थाः स्युर्धर्मस्यातिक्रमेण च ।
अरेर्वा प्राणिपातेन मास्मातबु(स्म तेषु) मनः क(कृ)थाः ॥ ५५० ॥

अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजम् ।
निराहाराः प्रजाः शोच्याः शोच्यं राज्यमराजकम् ॥ ५५१ ॥

यस्य दानजितं मित्रं शत्रवो बुद्धिनिर्जिताः ।
अन्नपानजिता दाराः सफलं तस्य जीवितम् ॥ ५५२ ॥

आशा धृतिं हन्ति समृद्धिमन्तः क्रोधः श्रियं हन्ति कदर्यताम् * ।
अपालनं हन्ति *** भूपे एकः क्रुद्धो ब्राम्हणो हन्ति राष्ट्रम् ॥५५३॥

अधीत्य वेदान्परिसंस्तर्यि चाग्नीनिष्ट्वा यज्ञैः पालयित्वा प्रजाश्च ।
गोब्राम्हणार्थे शस्त्रपूतान्तरात्मा हतः संग्रामे क्षत्रियः स्वर्गमेति॥५५४॥

प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता ।
कुलं शीलं दमश्चेति गुणाः संपत्तिहेतवः ॥ ५५५ ॥

कामन्दकः—

सकामासक्तमनसां कान्तामुखविलोकने ।
गलन्ति गलिताश्रूणां यौवनेन सह श्रियः ॥ ५५६ ॥

ग्रीष्मसूर्यांशुसंतप्तं उद्वेजनमनाश्रयम् ।
मरुस्थलमिवोदग्रं त्यजेद्दुर्जनसंगमम् ॥ ५५७ ॥

ये प्रियाणि प्रभाषन्ते प्रियमिच्छन्ति तत्कृतम् ।
श्रीमन्तोवयचरिता देवास्ते नरविग्रहाः ॥ ५५८ ॥

याने शय्यासने भोज्ये पाने शस्त्रे विभूषणे ।
सर्वत्रवाप्तमत्तः स्याद्बुद्धे न विषदूषणम् ॥ ५५९ ॥

संधिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षाड्गुण्यं चिन्तयेत्सदा ॥ ५६० ॥

पौरा जानपदान्सर्वाः शत्रुग्रहणसमयः ।
दीर्घाध्वानि परिश्रान्तं क्षुत्पिपासाहितश्रमम् ॥ ५६१ ॥

व्यसिदुर्भिक्षमरकपीडितं तद्वदेव हि ।
घोराग्निभयविन्यस्तं वृष्टिवातसमाहतम् ॥ ५६२ ॥

पङ्कपांसुजलस्कन्नव्यस्तं श्वासाकुलाकुलम् ।
प्रसुप्तं भोजने व्यग्रमभिष्वसनं स्थितम् ॥ ५६३ ॥

एवमादिषु जातेषु व्यसनेषु समाकुलम् ।
स्वसैन्यं साधु रक्षेत परसैन्यं च घातयेत् ।
विशिष्टो देशकालाभ्यां युक्तः प्रकृतिभिर्बलैः ॥ ५६४ ॥

निशि विश्रम्भसंयुक्तं तत्पैशिताविनावत् ।
इत्येवं कूटयुद्धेन हन्याच्छत्रुन्लघुस्थितः ॥ ५६५ ॥

उपरुन्धन्ति राजानो भूतानि विविधानि च ।
त एव विनयं प्राप्य वर्धयन्ति पुनः प्रजाः ॥ ५६६ ॥

ता लुण्ठेत्पीडयेच्च शत्रोः प्रकृतयः स्वयम् ।
वशे जाते पुनस्तासु पितृवद्वृत्तिमाचरेत् ॥ ५६७ ॥

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्च युद्धे चाभिमुखो गतः ॥ ५६८ ॥

आहवेषु मिथोन्योन्यं जिघांसन्तो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ॥ ५६९ ॥

द्वैपायनेन मुनिना मनुना च धर्मा
युद्धेषु ये निगदितास्तु तेगः (?) ।
स्वभ्यर्(र्व)र्थगोद्विजहिते त्यजतां शरीरं
लोका भवन्तु विपुलाः सुलभं यशश्च ॥ ५७० ॥

स्वर्गस्य मार्गा बहवः प्रदिष्टास्ते कृच्छ्रसाध्याः कुटिलाः सविघ्नाः ।
निमेषमात्रेण महाफलोयमृजुश्च पन्थाः समरे व्यसुत्वम् ॥ ५७१ ॥

द्विजा अपि न गच्छन्ति यां गतिं नैव योगिनः ।
स्वाम्यर्थे संत्यजन्प्राणांस्तां गतिं याति सेवकः ॥ ५७२ ॥

एतत्तपश्च पुण्यं च धर्मश्चैव सनातनः ।
चत्वारश्चाश्रमास्तस्य यो युद्धे न पलायते ॥ ५७३ ॥

यदि समरमपास्य नास्ति जन्तो-
र्भयमिति युक्तमतोन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जंन्तोः
किमिति मुधा मलिनं यशः कुरुध्वम् ॥ ५७४ ॥

वृद्धो बालो न हन्तव्यो नैव स्त्री नैव वा द्विजः ।
तृणपूर्णमुखश्चैव तवास्मीति च यो वदेत् ॥ ५७५ ॥

ब्राह्मणार्थे समुत्पन्ने * भिनिसृज्य युध्यति ।
आत्मानं यूपमुत्सृज्य स यज्ञोनन्तदक्षिणः ॥ ५७६ ॥

यस्य पार्वति शस्त्राणि तनुं भिन्दन्ति संयुगे ।
तावतः सोश्नुते लोकान् सर्वान्कामदुघोक्षयान् ॥ ५७७ ॥

यदस्य रुधिरं गात्रादाहवेषु प्रवर्तते ।
सह तेनैव रक्तेन सर्वपापैः प्रमुच्यते ॥ ५७८ ॥

त्यागेन यः सहायानां स्वप्राणांस्त्रातुमिच्छति ।
संहन्युः काष्टलोष्टैर्वा दहेयुर्वा कटाग्निना ॥ ५७९ ॥

अजामिव प्रजां हन्याद्यो मोहात्पृथिवीपतिः ।
तस्यैव जायते तृप्तिर्द्वितीयस्य कथंचन ॥ ५८० ॥

प्रजापीडनसंतापात्समुद्भूतो हुताशनः ।
राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनिवर्तते ॥ ५८१ ॥

भूमिर्मित्रं हिरण्यं वा विग्रहस्य फलत्रयम् ।
नास्त्येकमपि यद्येषां तन्न कुर्यात्कथंचन ॥ ५८२ ॥

शपथैः संधितस्यापि न विश्वासं व्रजेद्रिपोः ।
राज्यलोको(भो)द्धतो वृद्धः शक्रेण शपथैर्हतः ॥ ५८३ ॥

कौर्मं संस्थानमास्थाय प्रहारानपि मर्षयेत् ।
काले काले च मतिमान् उत्तिष्ठेत्कृष्णसर्पवत् ॥ ५८४ ॥

तावद्भयाद्धि भेतव्यं यावद्भयमनागतम् ।
आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ॥ ५८५ ॥

स्वगात्राण्यापि भाराय भवन्ति हि विपर्यये ।
मा त्वं तात बले स्थित्वा बाधेथा दुर्जनं जनम् ॥ ५८६ ॥

न हि दुर्बलदग्धानां बाल किंचित्प्ररोहति ॥ ५८७ ॥

यानि मिथ्याभिभूतानां पतन्त्यश्रूणि रोदताम् ।
तानि संतापकान्घ्नन्ति सपुत्रपशुबान्धवान् ॥ ५८८ ॥

बुद्धौ कलुषभूतायां विकारे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नोपसर्पति ॥ ५८९ ॥

न कालः खड्गमादाय शिरः कस्यापि कृन्तति ।
कालस्य बलमेतावद्विपरीतार्थदर्शनम् ॥ ५९० ॥

न तु हन्यान्महीपालो दूतं कस्यांचिदापदि ।
दूतं हत्वा तु नरकं प्राविशेन्मन्त्रिभिः सह ॥ ५९१ ॥

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
तदुभयहितकर्ता त्यज्यते पार्थिवेन्द्रैः ॥ ५९२ ॥

न कश्चिच्चण्डकोकानामात्मीयो नाम भूभुजाम् ।
होतारमभिजित्स्वन्ते दहत्येव हि पावकः ॥ ५९३ ॥

गृध्राकारोप(पि)सेव्यः स्याद्धंसाकारैः सभासदैः ।
हंसाकारोपि संत्याज्यो गृध्राकारैः सभासदैः ५९४ ॥

आसन्नमेव भजते नृपतिर्मनुष्यं विद्याविहीनमकुलीनमपण्डितं च ।
प्रायेण भूमिपतयो - - - - पार्श्वयोर्भवति तं परिवेष्टयन्ति ॥५९५॥

यस्मिन्सुधाधिकं चक्षुरारोपयति पार्थिवः ।
कुलीनो वाकुलीनो वा स श्रियो भाजनं भवेत् ॥ ५९६ ॥

धवलान्यातपत्राणि वाजिनश्च मनोरमाः ।
सदामत्ताश्च मातङ्गाः प्रसन्ने सति भूपतौ ॥ ५९७ ॥

आयाच्चतुर्थभागेन व्ययकर्म प्रवर्तयेत् ।
प्रभूततैलदीपोपि चिरं भद्राणि पश्यति ॥ ५९८ ॥

अबुद्धिमाश्रितानां च क्षन्तव्यमपराधिनाम् ।
न हि सर्वत्र पाण्डित्यं सुलभं पुरुषे क्वचित् ॥ ५९९ ॥

हन्तुमेवो(षो)पसर्पति मृगेन्द्रः संकुचत्यपि ।
बुद्धिमन्तः सहन्त्येव निधाय हृदि किंचन ॥ ६०० ॥

ऋतौ निवाहे व्यसने रिपुस्करे यशस्करे कर्मणि मित्रसंग्रहे ।
प्रियासु नारीष्वधनेषु बन्धुषु धनव्ययस्त्वेषु न गण्यते बुधैः ॥६०१॥

कोहं कौ देशकालौ समविषमगुणाः (केरयः के सहायाः
का शक्तिः कोभ्युपा[illegible]ः फलमिह च कियत् कीदृशी) दैवसंपत् ।

संपत्तौ को निबन्धः प्रविदितवचनस्योत्तरं किं नु मे स्या-
दित्येवं कार्यसिद्धावविहितमनसः संपदो हस्तसंस्थाः ॥६०२॥

परान्नं परवस्त्रं च परशय्यासनं स्त्रियम् ।
परवेश्मनिवासं च दूरतः परिवर्जयेत् ॥ ६०३ ॥

धनधान्यप्रयोगेषु विद्यासंग्रहणेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ ६०४ ॥

मूर्खस्तु परिहर्तव्यः प्रत्यक्षो द्विपदः पशुः ।
विध्यते वाक्यशल्येन अदृष्टः कण्टको यथा ॥ ६०५ ॥

कणशेषं शत्रुशेषमग्निशेषं तथैव च ।
पुनः पुनः प्रवर्धन्ते तस्माच्छेषं न धारयेत् ॥ ६०६ ॥

अशक्यं नारभेद्विद्वान्नवाकार्यं च कारयेत् ।
अफलं नैव सेवेत तथासत्यं च(न) जल्पयेत् ॥ ६०७ ॥

भजन्त भजते प्राज्ञो नाभजन्तं कथंचन ।
प्रत्यक्षं दृश्यते लोके हस्तं हस्तेन क्षालयेत् ॥ ६०८ ॥

रिपुराजाग्निसर्पेषु विषे चाग्निषु शृङ्गिषु ।
शस्त्रपाणिषु मूर्खेषु विश्वासो न कदाचन ॥ ६०९ ॥

न क्लेशविरहे द्रव्यं द्रव्यहीने कुतः क्रिया ।
क्रियाहीने कुतो धर्मो धर्महीने कुतः सुखम् ॥ ६१० ॥

जीवितं मृतकं मन्ये देहिनां धर्मवर्जितम् ।
मृतो धर्मेण संयुक्तो दीर्घजीवी भविष्यति ॥ ६११ ॥

स धर्मो यत्र नाधर्मस्तत्सुखं यत्र नासुखम् ।
तज्ज्ञानं यत्र नाज्ञानं सा गतिर्यत्र नागतिः ॥ ६१२ ॥

सत्यं शौचं दया दानं परद्रव्यं न गृह्यते ।
ब्रह्मचर्यं तपोमूलमेतद्धर्मस्य लक्षणम् ॥ ६१३ ॥

क्षीयन्ते सर्वदानानि राज्ञां होमे बलिक्रिया ।
न क्षीयते महादानमभयं सर्वदेहिनाम् ॥ ६१४ ॥

राज्यं च संपदो भोगाः कुले जन्म सुदृष्टता ।
पाण्डित्यमायुरारोग्यं धर्मस्यैतत्फलं विदुः ॥ ६१५ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा य नावसीदति ॥ ६१६ ॥

उत्तमैः सह संयोगं पण्डितैः सह संकथाः ।
अलुब्धैः सह मित्रत्वं कुर्वाणो नावसीदति ॥ ६१७ ॥

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
नीचवाक्यं चापमानं मतिमान्न प्रकाशयेत् ॥ ६१८ ॥

पण्डिताश्च विनीताश्च धर्मज्ञाः सत्यवादिनः ।
बन्धनस्थापि तिष्ठेयुर्न तु राज्यं खलैः सह ॥ ६१९ ॥

अर्थेनापि हि किं तेन अन्यायोपार्जितेन च ।
न तेन गम्यते स्वर्गं दत्तेन बहुनापि वा ॥ ६२० ॥

अतिलौल्यप्रसक्तानां विपत्तिर्नैव दूरतः ।
गलिका इव लुब्धानां मीनानां तु यथाम्भसि ॥ ६२१ ॥

स्त्रीषु राजसु सर्पेषु स्वाध्याये शत्रुविग्रहे ।
भार्यादिष्वपि विश्वासो न कर्तव्यः कथंचन ॥ ६२२ ॥

न जातु गच्छेद्विश्वासं संधितेपि हि बुद्धिमान् ।
अद्रोहसमयं कृत्वा वृत्रमिन्द्रः पुरावधीत् ॥ ६२३ ॥

बलीयसापि संधाय तं प्रविश्य प्रतापवान् ।
तथा साध्वनुगन्तव्यो यथा विश्रम्भमाप्नुयात् ॥ ६२४ ॥

नैकस्तु मन्त्रयेन्मन्त्रं न राजाबुद्धिभिः सह ।
नारोहेद्विषमां नावमपरीक्षितनाविकाम् ॥ ६२५ ॥

ये चास्य भूमिं जयिनो भवेयुः परिपन्थिनः ।
तानानवेक्षं सर्वान्सामादिभिरुपक्रमैः ॥ ६२६ ॥

यथा न स्यात्कृशीभावः प्रजानामनवेक्षया ।
तथा राज्ञा वर्तितव्यं स्वराज्यं परिरक्षति(ता) ॥ ६२७ ॥

मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया ।
सोचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥ ६२८ ॥

यो राष्ट्रमनुगृह्णाति स राज्य परिरक्षति ॥ ६२९ ॥

ग्रामस्याधिपतिं कुर्याद्दशग्रामाधिपं तथा ।
विंशतीशं शतेशं च सहस्रपतिमेव च ॥ ६३० ॥

इति श्रीमद्भूभृच्चलान्वयमुकुटालंकारश्रीमच्छाहराजसुतश्रीमच्छिवच्छत्र-
पालसुतश्रीमच्छम्भुराजविरचिते बुधभूषणे राजनीतिः ॥

तृतीयोऽध्यायः

प्रकीर्णनीतिः

उक्त्वा भूरिविभेदां बुधसंतुष्ट्यै राजनीतिमनवद्याम् ।
संप्रति मिश्रकनीतिर्विबुधविमोदाय तन्यते शिरसा ॥ १ ॥

क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते च कामान् ।
नासंस्पृष्टो ह्युपयुङ्क्ते परेषां तत्प्रज्ञानं प्रथमं पण्डितस्य ॥ २ ॥

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छान्ति याचितुम् ।
आपत्सु न विमुह्यन्ति नराः पण्डितबुद्धयः ॥ ३ ॥

प्रवृत्तवाक्चित्रकथा ऊहवान्प्रतिभानवान् ।
आशुग्रन्थार्थवक्ता च यः स पण्डित उच्यते ॥ ४ ॥

स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्याचरति मित्रार्थे यश्च मूढः स उच्यते ॥ ५ ॥

अमित्रं कुरुते मित्रं (मित्रं) द्वेष्टि हिनस्ति च।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ ६ ॥

अनाहूतः समभ्येति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ ७ ॥

एकः क्षमावतां दोषो द्वितीयो नोपलभ्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ८ ॥

सोस्य दोषो न मन्तव्यः क्षमा हि परमं बलम् ।
अक्षमावान्परं दोषैरात्मानं वापि योजयेत् ॥ ९ ॥

द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके महीयते ।
अब्रुवन्परुषं किंचिदसतो वर्जयंस्तथा ॥ १० ॥

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ११ ॥

अष्टौ पूर्वाणि चिह्नानि नरस्य विनाशेष्यतः ।
ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ १२ ॥

ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति ॥ १३ ॥

नैतान्स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
एतान्दोषान्नरः प्राज्ञो वध्ये बुद्ध्वा विवर्जयेत् ॥ १४ ॥

नाक्रोशी स्यान्नावमानी परस्य मित्रद्रोही नोत नीचोपसेवी ।
न चाभिमानी न च हीनवृत्तो रुक्षां वाचं वर्जयन्तीम् (?) ॥१५॥

अप्रशस्तानि कार्याणि यो मोहादनुतिष्ठति ।
स तेषां विपरिभ्रंशाद्भ्रश्यते जीवितादपि ॥ १६ ॥

दैवतेषु च यत्नेन राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा क्रोधो वृद्धबालातुरेषु च ॥ १७ ॥

निरर्थं कलहं प्राज्ञो वर्जयेन्मूढचेतसम् ।
कीर्तिं च लभते लोके न चार्थेन योजयेत् ॥ १८ ॥

विनयेन विना का श्रीः का निशा शशिना विना ॥
रहिता सत्कवित्वेन कीदृशी सा विदग्धता ॥ १९ ॥

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन तु ।
नेत्रवक्त्रविकारैश्च ज्ञायतेन्तर्गतं मनः ॥ २० ॥

सिद्धमन्त्रौषधं धर्मं गृहाच्छिद्रं च मैथुनम् ।
कुभुक्तं कुश्रुतं चैव मतिमान्न प्रकाशयेत् ॥ २१

येषु दुष्टेषु दोषः स्याद्योगक्षेमस्य भारत ।
सदा प्रसादनं तेषां देवतानामिवाचरेत् ॥ २२ ॥

दुर्बुद्धिमकृतप्रज्ञं छन्नं कूपं तृणैरिव ॥
विवर्जयीत मेधावी तस्मिन्मैत्री प्रणश्यति ॥ २३ ॥

मार्दवं सर्वभूतानामनसूया क्षमा धृतिः ॥ २४ ॥

अवृत्तिं विनयो हान्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ॥ २५ ॥

नानीयात्प्रेषणे भृत्यान्बान्धवान्व्यसनागमे ।
मित्रं चापत्तिकाले च भार्यां च विभवक्षये ॥ २६ ।
स्वामिनि गुणान्तरज्ञे गुणमपि भृत्येनुवर्तिनि कलत्रे च ।
मित्रे चानुपवर्गे निवेद्य – – सुखी भवति ॥ २७ ॥

उत्पाद्य पुत्राननृणांश्च कृत्वा वृत्तिं च तेभ्योनुविधाय कांचित् ।
स्थाने कुमारीः प्रतिपाद्य सर्वा अरण्यसंस्थोश्च मुनिर्बुभूषेत् ॥ २८ ॥

उत्थानं संयमो दाक्ष्यमप्रमादो धृतिः स्मृतिः ।
समीक्ष्य च समारम्भो वृद्धिमूलं भविष्यति ॥ २९ ॥

अतिक्लेशेन येर्थाः स्युर्धर्मस्यातिक्रमेण च ।
अरेर्वा प्रणिपातेन मा स्म तेषु मनः कृथाः ॥ ३० ॥

त्यागेन हीनस्य कुतोस्ति लक्ष्मीर्धैर्येण हीनस्य कुतोस्ति सिद्धिः
अशुद्ध ॥ ३१ ॥

आर्तो वा यदि वा त्रस्तः परेषां यदि वागतः ।
अपि प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥ ३२ ॥

देहे पातिनि का रक्षा यशो रक्ष्यमपातयन् ।
नरः पतितकायोऽपि यशःकायेन जीवति ॥ ३३ ॥

सुलभाः पुरुषा लोके सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य श्रोता वक्ता च दुर्लभः ॥ ३४ ॥

दानोपभोगवन्ध्या या सुहृद्भिर्या न भुज्यते ।
पुंसां हि यादे सा लक्ष्मीरलक्ष्मीः कतमा भवेत् ॥ ३५ ॥

प्रियः प्रजानां दातैव न पुनर्द्रविणेश्वरः ।
आगच्छन्काङ्क्ष्यते लोकैर्वारिदो न तु वारिधिः ॥ ३६ ॥

याचितो य* प्रहृष्येत दत्त्वा च प्रियवाग्भवेत् ।
तं दृष्ट्वाप्यथवा स्पृष्ट्वा नरः स्वर्गतिमाप्नुयात् ॥ ३७ ॥

पुत्रो वशी स्वार्थकरी च विद्या अरोगिता मित्रसमागमश्च ।
भार्या विनीता प्रियवादिनीच शोकस्य मूलोद्धरणानि पञ्च ॥ ३८ ॥

अविनीतो भृत्यजनो नृपतिरदाता * * नि मित्राणि ।
अविनयवती च भार्या मस्तकशूलानि चत्वारि ॥ ३९ ॥

कान्ताविवियोगः स्वजनापमानो ऋणस्य शेषः कुजनस्य सेवा ।
दारिद्र्यदावाभिमुखं तु मित्रं विनाग्निना पञ्च दहन्ति गात्रम् ॥ ४०॥

द्यूतं च मांसं च सुरा च वेश्या पापर्द्धिचौर्यं परदारसेवा ।
एतानि सप्त व्यसनानि सप्त नरं सुघोरं नरकं नयन्ति ॥ ४१ ॥

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुणे नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले ।
एते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ ४२ ॥

कलासु यत्नः पुरुषेण कार्यो न किंचिदप्राप्यतमं कलानाम् ।
कलाप्रकर्षादुडुपेन शम्भोरनर्घ्यमासादितमुत्तमाङ्गम् ॥ ४३ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनात्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयात्
स्त्री गर्भादनवेक्षणादपि कृषिस्त्यागावमानाद्धनम् ॥ ४४ ॥

उचितमनुचितं वा कुर्वता कार्यजातम्
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाहे शल्यतुल्यो विपाकः ॥ ४५ ॥

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ४६ ॥

यदिच्छासि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्यैश्च चरन्तीं गां निवारय ॥ ४७ ॥

अविवेकमतिर्नृपतिर्मन्त्री गुणवत्सु वक्रितग्रीवः ॥
यत्र खला(श्च) प्रबलास्तत्र कथं सज्जनावसरः ॥ ४८ ॥

राजा संपत्तिहीनोपि सेव्यः सेवागुणान्वितैः ।
भवत्यजीवनं तस्मात्फलं कालान्तरादपि ॥ ४९ ॥

मित्रं स्वस्थतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्येण द्विजमादरेण युवतिं प्रेम्णातितीव्रैं(थैं ?) स्तवैः ।
बन्धुं च क्षमया गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं शीलेन कुर्याद्वशम् ॥ ५० ॥

अर्थी लाघवमुच्छ्रितो नियतनं कामातुरो लाञ्छनम्
लुब्धोऽकीर्तिमसङ्करः परिभवं दुष्टोन्यदोषे रतिम् ।

निःस्वो वञ्चनमुन्मना विकलतां शोकातुरो म्लानताम्
दुर्वागप्रियतां दुरोदरवशः प्राप्नोति कष्टं मुहुः ॥ ५१ ॥

कीर्तिर्भूमिभुजां रतिर्गुणवतां ह्रीरङ्गनानां धृति-
र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
विद्वांसः सदसोम्बुजानि सरसां सस्योन्नतिर्नीवृता-
मुद्यानं नगरस्य वारि सरितां स्वास्थां (स्थ्यं) सतां मण्डनम् ॥५२॥

कार्पण्येन यशः क्रुधा गुणचयो दम्भेन सत्यं क्षमा
लोभेन प्रमदा हठेन जरया रूपं तमो ज्योत्स्नया ।
सेवाभिर्महिमा मदेन विनयः स्नेहः प्रवासैस्तथा
मानोनुव्रजनेन कर्म कपटैर्विद्या धनैर्गच्छति ॥ ५३ ॥

मूर्खः शान्तस्तपस्वी क्षितिपतिरलसो मत्सरी धर्मशीलो
दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्महीनः ।
प्रज्ञाहीनो नरेन्द्रः स च सचिववशो नास्तिकः शास्त्रद्रष्टा
वृद्धो रोगी दरिद्रः स च युवतिपतिर्धिग्विडम्बप्रकारः ॥ ५४ ॥

स्त्रीणां यौवनमर्थिनामनुगमो राज्ञः प्रतापः सताम्
सत्यं स्वल्पधनस्य संततिरसद्वृत्तस्य वाग्डम्बरः ।
आचारस्य सुशीलता नयवतां स्थैर्यं कुलस्यैक्यता
पूजाया धनमुन्नतेर्गुणचते (रति ?) शान्तेर्विवेकोचयम् (?) ॥५५॥

विद्वान्संसदि पाक्षिकः परमतो मानी गृहस्थो व्ययी
भिक्षुर्भोगपरो यतिर्विसुमना मूर्खश्च पाण्डित्यकृत् ।
निःस्वः कामयतेथ कुप्यति मृषा वृद्धो विवाहोद्यतो
वेदान्ती हतसान्क्रियः किमपरं हास्यास्पदं भूतले ॥ ५६ ॥

को लाभो गुणिसंगमः किमपरं प्राज्ञेतरैः संगतिः
का हानिः समयच्युतिर्निपुणता का धर्मतत्त्वे रतिः ।
कः शूरो विजितेन्द्रियः प्रियतमा कानुव्रता किं धनम्
विद्या किं सुखमप्रवासगमनं राज्ञः किमाज्ञा फलम् ॥ ५७ ॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवं प्रधानमिति कापुरुषा वदन्ति ।
दैवं विहाय कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोत्र दोषः ॥ ५८ ॥

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
यवेच्य—

Notes

[K. N = Kāmandakīya Nītisāra, V. D. = Viṣṇudharmottara Purāṇa;
M. P. = Matsya Purāṇa, M. B. = Mahābhārata.]

CHAPTER II

4-6 " — K N. IV. 14-16. V. L. —स्वविग्रह in 4; परच्छिद्रान्वेक्षी in 5, विनियोक्ता च पात्रवित् in 6.

7a — K. N. IV 17a

7b — K. N. IV 18a.

7c — K. N. IV. 19b

8 — K. N. IV. 20.

9-14 — K N IV. 4-9. V. L. दुर्धार्य in 9; साध्वा or साध्यामि-गामिका in 13.

15 — V. D. II. 3. 1.

16-19a — V. D II 3 3-6a V. L. ग्रंथ गंजश्चे धनुषि in 18.

19b — V. D. II. 3 7a.

20a — V. D II 3 7b.

32b-34 — M. P. 220. 19-20. V. L. धर्मज्ञ in 33a; प्रयत्नत in 34.

35-39 — M. P. 215. 2-6 V. L. II, 24. 2-6.

40 — Yājñavalkya I. 312.

41-42 — Manu VII. 61-62.

47-59 — V. D. II 6. 1-14 V. L :—स्थूललक्षो महोत्साह in 48; यत्कार्यं न वदन्ति महीक्षित in 49; क्लेशक्षमस्तथा यश्च in 50a; गूढमन्त्रश्च दक्षश्च in 50b; प्रणिधिप्रणयात्मवान् in 52a; वक्ता विधाता in 53a; विग्रहास्पदतत्त्ववित् in 56a; यस्तु कार्याणि विवि-धानि महीपते in 58a; तस्याभिरतस्य in 59b; वंशश्च दीप्तो in 59d.

63 — K. N. XIV. 25. V. L हि भूपते in a.

64 — K. N XIV. 24a, 23b, 21b V. L. राजराज्याभिरक्षण in a; अभित्रप्रतिषेधनं in b; तद्व्यसना° in c.

65-67 — Manu VII. 58, 60, 54

68 — K. N IV 24 V. L. अनुरागिण: in a.

72 - K. N. VII 1. V. L. अतन्द्रिता in b.

73-78 — M P 220. 2-7. V. L. शिक्षयेच्चैनं नाप्तैर्मिथ्या० in 74b; यौवनगोचरे in 75b; क्रमेणाथ महत्स्वपि in 78b. cf also V.D.II. 65. 3-9a. V. L स्थेश्चे in 74a; च्चैवमाप्तैर्मिथ्याप्रियंवदैः in 74b; यौवनगं सुखे in 75b; विर्यतेन कृष्यते in 76a; विशीर्यते in 77b

79-81 — K N. VII 2-4 V L. मद्दोन्मत्ता in 79a; भ्रातरं वापि निघ्नन्ति पितरं वाभिमानिन in 79b; रक्ष्यते राज्यं in 80b; गश्चि-तारमसशय in 81b.

92-94 — K N. VII. 5-8 V. L. परित्यागं सुदुर्वृत्तोपि नार्हति in 93a.

95-96 — K N IV. 42-43 V L वारयन्ति ये in 96a, which is surely better than our reading; न तेहि सुहृद in 96b.

97-98 — K. N. IV. 60-61 V. L. ब्रह्मज्ञानो in 97a; ईप्सित० संपन्नो० in 97b

103b-105 — K. N XIV 33-34. V. L. कोशमूलो हि in 103b; कोश-व्यसन० in 104a.

109-110 — K N. VI. 8-10. V. L. शासनोभिरतःसतां in 109a; राज्योप० in 110a; सहता वा तान् द्रुह्यान्० in 110b.

111 — Manu, VII. 74.

112-113 — M. P. 117. 5-6a, V. L. व्याघ्रतस्करवर्जितं in 112a; V. D. II. 26, 5-6a.

114 — Manu, VII 70; M P. 117, 6b-7a; V D. II. 26. 6b-7a

151-116 — M. P. 217, 7b-9. V. L विशेत्पुरं in 116c; V. D. II. 26 7b-9.

117 — Manu VII 76.

118 — M. P 218 38.

119-150 — M. P. 217. 10-42 V. L मुक्तिहीन or शुक्ति० in 122a; तद्गमन् or वशात् in 123a; तन्न कर्तव्यं प्रयत्नेन० in 123b; गजवेश्मत: in 124b मन्त्रिवेश्मविनं in 127b; ours is better; तथाभागे कोष्ठागार विधीयते in 128a; मकटांश्च विशेषत.

in 130b ; तत्र तत्र in 132a ; विद्या शुभान् in 133b ; भृशं राजा in 134b : न बहूनामतो दुर्गे विना० in 135b ; भूभुजा in 137a ; संचयश्चात्र० in 137b ; तोमराणांच पार्थिव in 138a. For 139, M. P. reads :—लगुडाना गुडाना च हुडाना परिघैः सह । अश्मना च प्रभूताना मुद्गराणा तथैव च । त्रिशूलाना पट्टिशानां कुठाराणा च पार्थिव । प्रासानां च सशूलानां शक्तीना च नरोत्तम । ; कुद्दालरज्जु० and पीठकानां in 140b ; तुषाणा चैव दात्राणामङ्गाराणां च संचयः in 141a , our reading gives no sense. इन्धनाना च संचयः in 142b , The order of vv. 144–7 differs in M. P. मृगाश्च पक्षिणः in 148a , पृथिवीक्षिता in 149a ; द्रव्याण्यशेषतः in 149b 150b is a mere repetition of 149a. Also cf. V. D. II. 26. 10–42.

151–154 — M. P. 217. 84–87. V. L. धारणं कार्य in 151a ; पिशाचघ्नाः पापघ्नाः० in 152a ; कलाविदश्च पुरुषा in 152b , भीतान्प्रमत्तान्कुपितान् in 153a , दुर्गसुषुप्तं० in 154d ; obviously our reading is the correct one.

155 — M. P. 216. 39 ; V. D. II. 24 38.

185–186 — K. N. XIX. 2a-3 , V. L मौलं भृतं in 186a ; बलाना व्यसनं तथा in 186b.

188–190 — M P. 215. 8–10 ; V. L. फल्गुसारविशेषवित् in 190a.

194–195 — M. P. 215. 36–37. V. D स्थविरश्च विशेषतः in 195a.

196 — M. P. 215. 38. V L चिकित्सनविशारदः in a ; प्रशस्यते in b.

203 — V. D. II. 24. 64b–65a. सदा चरान् in a ; जनस्याविततान् in b ; our reading is better. cf. also M. P. 215. 91b–92a.

204–207 — M. P. 215. 90c–91a ; 92–94 , V. D. II 24. 63b–64a ; 65b–68a.

208–210 — K. N. XIII. 27–29. V. L. जगता मतं in 208b ; विद्योन्वह in 209a ; हि ते in 209b , चैरिविचेष्टितं in 210a.

211 K. N. XIII. 31a, 32. Perhaps कामन्दकोपि is to be read before v. 208.

216 — M. P, 215. 24.

219-220 — M. P. 215. 34-35.

222 — Manu VII. 146.

223 — M. P. 215. 18. V. L. कुलोचितः in a; शूरः क्लेशसहश्चैव in b.

224-225 — M. P. 215. 14-15.

227-228 — K. N. V. 21-22. V. L. भर्तुरर्थासने दृष्टिं in 227a. कोत्रेत्य० in 228a.

229-234 — K. N. V. 23-28. V. L. हासं in 229a; चानुरागेण चित्तं चित्तजसंभवः in 230a; तत्पक्षं in 230b; वादे वा वादिनां मम् 231b.

235 — K. N. V. 58.

236 — M. P. 216. 3. तद्धितं भवेत् in b.

237-239 — M. P. 216 9, 16, 23.

243 — Manu, VII. 147.

244-247 — Manu, VII. 151-154.

261 — K. N. XII. 47. V. L. निष्कुड्यान्तर० in a; प्रासादाग्रे ह्यरण्ये in b.

262-263 — K. N. XII. 44a, 45b, 46. V. L. आवर्तयेन्मुहुमन्त्रं धारयेच्च प्रयत्नत in 262a, आप्तपरंपरा in 262b, भिन्दन्ति मन्त्रं प्रच्छन्नाः in 263b.

264-270 — K. N. XII. 48-54. V. L. कार्य बुद्धिविवृद्धये in 265b; एकेनापि क्कार्याणि प्रविचार्य० in 266a; प्राविशेत् in 266b; यद्य-द्ब्रूयात् in 267b, अतिक्रामेत्कदाचन in 269a; कार्ययोग. in 269b; साधु रसवत् फलमश्नुते in 270b. My suggestion that it is असकृत् is not supported by the printed text. Nor is it absolutely necessary.

271 — K. N. XII. 58.

272-273 — K. N. XIII. 1-2. V. L. कृतमन्त्र. सुमन्त्रज्ञो मन्त्रिणं मन्त्रि-संमतम् in 272a; read दूत in 272b.

274-275 — K. N. XIII. 4, 6, 7. V. L. स भर्तुः० in 274a; स्ववाक्यपर-वाक्यानामिति in 274b; कार्यार्थमनु० in 275b.

277-279 — K. N. XIII. 11, 12, 14. V. L. वध्यमानोपि० in 277a; प्रश्रितया वाचा in 277b; द्रव्येण कर्मणा च in 278a; तपस्वि-व्यञ्जनोपेतैः स्वचारैः सह संपतेत् in 279.

280-282 — K. N. XIII 22b-25. V. L. वार्ता विशेषार्थी भर्त्रे in 280a. Read सर्व instead of सर्वा in the text; परिच्छेद· सुहृत्० in 280b; कृत्यपक्षोप० in 281a, गष्ट्राटव्यन्तपालानामात्मसात्क-रणं० in 281b: युद्धापसार० in 282a; कर्मेति कीर्तितम् in 282a, °दार्ढ्यविमर्शनम् in 282b, स्वपक्षे च, which is better, in 282c

283 — K. N. IX 66. V L चित्तम्मे नित्यमुद्युक्तो in a.

284 — K. N. X 27 and Manu VII. 171.

285 — K N. X 31. V L फलं त्रयम् in a.

286-288 — K. N X 34-36. V. L अर्थेन वैतसी० in 287b; सम्प्रा-प्नोति in 288a.

289 — K. N X 39a

290-294 — K. N X. 40-44 V L. कालमास्थित: × × × × कचग्रहं श्रिय: in 290b, कृतज्ञ मतिमन्तं in 291a; द्यतिदीर्घसूत्रता in 292b, करोत्यविद्वान् in 293b, the commentary in the printed text construes as असाधुजनस्य संमतः; मनीषयान्वीक्षितमण्डलाक्रिय. in 294a, रियरोद्यम: in 294b.

295-300 — K. N XIV 4-9. V. L भाजनं परमं श्रीणा in 295b; उत्थानाध्यवसायाभ्या in 296b. Read संपन्नाद्बुद्धि० 297a; चोप-गच्छति in 297b; प्रविशन्ति महालक्ष्म्य: in 298b; श्रीभि: षण्ड इव स्त्रीभि· in 299b, श्रियो हि सततोत्थायी in 300b.

301 — K. N. XIV 10b-11a. V L सदैवेच्छेत् in a, which is better, वंशश्रियं in b

302-305 — K N XIV. 13-17a V. L. स्फुरन्नीक्षणग्वङ्गांशु० in 303a; नीचो० याति in 304b; महत्सत्वमधिष्ठित: in 305a; करोत्येव पद्म मूर्ध्नि केसरी मत्तहस्तिन· in 305b; भोग भोगीव in 305c.

306 — K. N. XIV. 22. V L. तरय कर्म in b.

307-309 — K. N. XIV. 23b-26. V. L. अमित्राप्रति० in 307a; °हि भूपति. in 308b. हिरण्यवस्त्रधान्यादि वाहनादि तथैव च in 309a.

310 — K. N. XIV. 31a-32

311-315 — K. N. XIV. 41-46a. V. L. सद्वर्णाश्रम० in 311a; °मार्गानुशिक्षणं in 311b, धृतता शाठ्ययुक्तेषु सत्सु सद्वृत्त० in

313b Read धूर्तता असाधु०; °नुमन्त्रत्वे० नात्स्थ्यमेव च in 314a; प्रशस्त्रध्यक्ष० in 315a; °चावरोपणं in 315b

316a — K N XIV. 47a V. L. धर्मासनप्रति०.

316b — K. N. XIV 52a.

317a — K N. XIV. 53a. V. L. अदण्ड्यमदण्ड्यानां.

317b — K. N. XIV. 58b.

318-319 — K N XIV 59-60 V L राजा नयपुरःसरः in 318a; तंयवाग्वरय० in 319a, सन्धेर्तुमर्हति in 319b.

320-323 — K. N. XIV. 61-64. V. L. प्रमादो वैरकारिता in 321a; पूर्वोपदिष्टच in 321b; मूषिका. शलभाश्चयः in 322a; असत्कश्च दण्डश्च in 322b.

324 — K N XIV 66.

325 — K N XIV. 65 V. L. विशीर्णयन्त्रप्राकारपरिखात्वमशास्त्रत in a, क्षीणवासेन्धनान्नत्वात in b.

326-327 — K N. XIV. 67-68. V. L विमानितममानित in 326a; अभूतं व्यधित० in 326b, अनृतप्राप्तमेव च in 327b.

328 — K N. XIV 71a, 72a.

329-330 — K. N. XIV 19b-21 V. L. दुर्भिक्षं मरणं तथा in 329b; शान्त्या वा प्रशम नयेत् in 330a.

331-334 — K. N. XIV. 33-35, 36b. V. L जहात्याशु in 331b; भूमीना च प्रसाधनं in 333b, दण्डादेतत्प्रभवति in 334. In the printed text, the last two verses are construed in the context of दण्ड, while in our book all the four verses speak of कोश

335 — K N XV. 1 V L. मित्रान्ता राज्यमुच्यते in a I cannot guess what the third line was.

336-337 — K N. XV. 2-3. The printed text of K N. reads राजा त्वव्यसनी राजव्यसनापोहनक्षम for 336a; V. L. न राजव्यसनापोहे समर्थं in 336b; आत्मामात्यप्रजादुर्गकोशानां० in 337a.

338 — K N XV 7 338a is the same as K. N XV. 7a, 338b, however, seems to be made up of 7b

and 8b, the former reads ·—मृत व्यसनतत्त्वज्ञै क्रोधज व्यसनत्रय, the latter reads ·—व्यसन व्यसनार्थज्ञैश्चतुर्विधमुदा-हृतम्.

339-345 — K. N. XV. 9-15. V. L. न कुर्याद्विप्रिया वाचं प्रकुर्याज्जनमात्म-नात् in 339b, मर्माच्छिन्निपतन्० in 341a, रूक्षया प्रियवाग् भवेत् in 342a; प्रियवाक्यमा in 342b, न युक्त्यैव नयेद्दण्ड in 343b. तस्मान्नोद्विजयेत् in 345b.

346 — K. N. XV. 17 V L. तत्र दण्ड प्रशस्यते in b

347-353 — K. N. XV 18-22, 24-25 V L तदकस्मात् in 348a; अभि-यानस्य सपत्या यानव्यसनज महत् in 350a, वृक्षसङ्कटजा दुर्गा in 351a, स्वमन्यैश्च स्वकुलैश्च परभिन्नैश्च मार्गणे in 352a, अहाजगर मातङ्ग० भयादि च in 352b; दवाग्निधूमसंघो in 353a

354 — K. N XV. 26 V. L. जितश्रमत्वे व्यायाम in a Read आर्मभट्ट०.

355 — K. N XV. 28 V L यौग्यैयव दिवानिशम् in a; चेरुर्यन्त्र-लक्ष्येषु in b.

356a — K N XV 27b

357-360a — K. N. XV. 29. 30b-32 V. L °गुप्तमे विषादपवर्जिते in 359a. विलेरुपशोभिते in 360a

360b — K. N. XV 35a V. L. सुपात्यमृगसंपूर्ण०

361 — K. N. XV. 37b-38 V. L मन प्रीति० in a, तद्वेनचर-चित्तैः क्लेशायास० in b, भूभुजामभिवृद्धये in c

362-364 — K. N. XV 40-41, 43 V L. प्रातश्चङ्क्रमण० in 362 a; महिते। मते in 362b, °तिष्ठत् मैन्यं द्वान्तगोचरं in 363b; मृगया मृगयुर्यथा in 364b

365-377 — K. N. XVI 1-2a, 3-4; 5b-7a; 10-11, 13-15a, 16a. V.L. व्यसनैर्विवर्जित० in 365 a, इत्येवमुपादिशन्ति in 366a; तदानि यायादहितानि कर्तुं परस्य वा पीडनकर्शनानि in 367a, स्ववीर्यधामार० in 368b, निर्मन्थ्यैर्व। स्वमुखेन० in 369a, प्रभूतास्रुवनेन० निर्वापणार्थ० in 370a, कुष्ठानि मतंगजाना in 370b; शरीरेषु हि जाड्य० in 371a, राज्यं निबद्धं० in 373a धीरतमेन पुंसा in 373b; परिकल्पितानां in 374a, यतोन्नयानोपचयोऽविशङ्क in 374b, विश्रमयन्० in 375a अभ्युन्नतामग्रयुद्वारं० in 375b.

378-379 -- K. N. XVI. 18-19 V L. गच्छद्वहि प्रचारान् बाह्यांश्च कृत्वा विहिनार्थकल्पान् in 379b. The latter half of 379b, corresponds with the latter half of K. N. XVI. 21b. It is quite possible that the scribe of our MS may have left the intervening verses (i. e. K. N. XVI. 19b, 20, 21a) through oversight This is borne out by the fact that v 380 of our text is—K. N. XVI. 22a.

381-393 -- K. N. XVII 1-11 : 16b-17. V. L. यात्वा वैरि० in 381a, महारवातसमा० in 382b, सामर्थ्यादिगारमुप० in 383b; कक्षपुटाकारं महामार्गसना० in 384b, महन्मौलबलान्वितं in 385a; कोशगृहापितं in 385b, मौलं भृत in 386a, अन्त स्व-वर्गिण कुरानलुब्धान् दृष्ट० in 387a, मण्डलेन निवेश० in 387b; लब्धनामानस्तुरङ्गाश्च० in 388a: दिवमुद्यायुधे in 389a; निष्ठे ट्राजाभिगुप्तये in 389b, साध्वविष्ठित in 390a; सैन्याविघातार्थ in 392, क्वचिच्छुले in 393a.

394-410 -- Yajñavalkya, I 323, 326, 334-344 . 349-351.

414-415 -- M. P. 220. 14-15

417 -- M. P 220 16.

418-422a — M. P. 220. 21-25 V L तथा तेन in 418a; यस्तथैकस्य in 418b, दारुणनातितीक्ष्णा० in 419b; नृपं हर्षवशं गतं in 421b

— V. D II 65 22a-27a V. L. हर्षलसत्कथं in 421b. This appears to have been the reading of our MS

425-428 — Mann VII 47-50. V. L II 65. 27-31.

429-432 -- M. P 220 26-27 : 29a-31a : दु सव्यभावत in 430a; स्मितपूर्वाभिभाषी स्यात् in 430b.

-- V. D. II. 65. 27a-29a , 31-32. V. L. उत्क्षिप्तचेतस in 429b . otherwise this agrees with M. P.

433-435 -- M. P. 221. 7b-10a V. L. फलावहं in 434b; नरै· in 435c.

436 -- M. P 222. 2

437 — M. P. 222 3b-4

438 — M. P. 222. 10. V. L. ऋजव प्रणीता in a; सत्यपरा विनीता in b; मानोन्नता ये in d; Also—V. D. II. 67–10 which agrees with M. P.

439 — M. P. 223. 1 V. L तु ये दुष्टा and भीनावमानिता in a.

440–442 — M. P. 223. 7–9. V. L. चाह्यस्तु and महीभृत. in 441a; सेनापतेर्नृप in 441b.

443 — M. P. 224. 1. V. L. °तमं भतं in a; सुदर्शनेह भवति in b.

444 — M. P. 224. 8. V. L. सुदुर्जयं यो विबुधाधिवास: in d.

445 — M. P. 225. 1.

446 — M. P. 225. 5 V. L. य: स्वधर्मेण तिष्ठति in b.

447–448 — M. P. 225. 16b–17.

453–456 — Yājñavalkaya, II. 12–15

457–458 — K. N. XIV. 36a–38a.

461 — Yājñavalkya, I, 367.

465 — Manu, VIII. 310

466–467 — Manu, VIII 124–125.

468a — Manu, VIII. 379a

479 — Manu, VIII 335

480 — Yajñavalkya, I. 359

483–485 — Manu, VII 3–5.

486–495 — M P. 226. 1–5, 8–12.

496 — M. P 227 217

498–500 — M. B. V 34. 10–12.

501–504 — M. B. V 34. 15–18

506–511 — M B V. 34. 24–29

512 — M B V 34. 43

513 — M. B V 34 62

514 — M. B. V 34 80. In d, read नावसृजेत्परेभ्य: ।

515 — M. B V 35 41. V. L. सिध्यन्ते नात्र in b.

516 — M B. V. 35 51.

517 — M. B. V. 36. 58.

518 — M. B. V 36. 61.

519 — M. B. V. 36. 60.

520 — M. B. V. 37. 7.

521 — M. B. V. 37. 19.

522 — M B V 37 26.
523-526 — M. B. V. 37. 52-55
527 — M. B V. 38 26. Read अमोघक्रोधहर्षस्य in a.
528-530a — M B. V 38. 37b-39. Read वागनिष्टु। in 528b.
530b-531a— M B V. 38. 29.
531b-532a— M B. V. 38. 43
532b-535a— M. B V. 39. 6-8. Read वृद्धि: for वृत्ति: in 532b
वृद्धि for बुद्धि in 533 ; यं लब्ध्वा बहु नाशयेत् in 534a
535b-536a-- M B V 39. 18b-19a
536b-537 — M. B V. 39 23b-24.
538-541 — M B. V. 39 37b-41a.
542-543 — M B V 39. 46b-48a.
544 — M. B V. 39. 55b-56a.
545-548 — M. B. V. 39. 61b-62 ; 64-66a.
549-551 — M B V 39. 75b-78a.
552 — M B V. 39. 83.
553 — M. B. V. 40 8. Read यश: कदर्यता in b ; हन्ति प [illegible]
राजन् in c.
554 — M. B. V 40. 26.
555 — K. N. I. 22
556 — K N I. 48.
558 — K. N III. 30.
561-565 — K. N. XVIII. 50-54.
568 — M B V. 33. 61.
569 — Manu, VII. 89.
623-624 -- K. N IX. 53 ; 64.
628 -- Manu, VII 111.
630 — Manu, VII. 115.